ॐ स्वस्ति॥ स्वौजसमौडित्यादिना स्वादयो ह्याप्रातिपदिकाद्विहिताः तेषामर्थविशेषे व्यवस्थां दर्शयितुमारभते॥ प्रातिपदिकादित्यादिना॥ प्रथ
मादयः सप्त संज्ञाः प्राचां सङ्केतात्सिद्धा व्यवहाराः इति। स्वौजसमौट्छष्टीति सूत्रकृतो ङेकौ स्यमेतु इह प्रथमादयः शब्दाः सुपां त्रिकेषु वर्त्तन्ते।
सप्त स्यादिति न्यायादित्युक्तम्। तथा च न्यायसिद्धत्वादस्मिन् शास्त्रे प्रथमादिसंज्ञानामकरणेऽपि न क्षतिरिति बोध्यम्। यद्यपि पञ्चकं प्रा
तिपदिकार्थ इति सूचितं ततो लिङ्गवचनग्रहणमनर्थकं। प्रातिपदिकार्थ इत्येव सिद्धेः मात्रग्रहणाच्च। कर्मादिव्यवच्छेदो न स्यात् प्रातिपदिकार्थादन्ये र्थ
तिरेकात्। त्रिपद्येऽपि लिङ्गग्रहणमनर्थकमेवेत्याशङ्क्याह विवक्षिते दर्शयति। नियतोपस्थितिक इति। यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्योपस्थिति
यमेनोपस्थितिः स प्रातिपदिकार्थ इत्यर्थः। शाब्दबोध इति यावत्। नन्वेवं हि हे माले वक इत्यादौ प्रथमा न स्यात्। अत्राहुः। शक्यार्थमादाय प्रथमाविभक्ते
रूपत्वतो सत्यां प्रत्ययान्तरसमभिव्याहारे तत्र प्रातिपदिकार्थबोधे विवक्षितत्वभावादिति। मात्रशब्दस्यैवेति। तस्य कार्त्स्न्यावधारणमर्थः। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः।
प्रातिपदिकार्थलिङ्गपरिमाणवचनेष्वेव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेष्वित्येवकारेण स्वपदविग्रहः। समासस्तु मयूरव्यंसकादित्वात्
बोध्यः। प्रत्येकमिति। द्वन्द्वे प्रथमाश्रवणात्त्वादिति भावः। ननु वीरः पुरुष इत्यादावभेदसंसर्गस्याधिकस्याभावात्प्रथमा न स्यात्। न च पूर्वापरेत्यादि
स नाद्वीरशब्दस्य समासविधाने प्रत्ययोत्पत्तौ लिङ्गमिति वाच्यम्। द्वितीयाद्यन्तानामपि वीरपुरुषमानयेत्यादौ तद्विधानस्य चरितार्थत्वात्। इति चेन्न। संस
र्गस्य वाक्यार्थत्वेन बहिरङ्गत्वात् प्रथमाप्रवृत्तौ संस्कारबाधानुपपत्तेः॥ पदसंस्कारपक्षस्यैवेहाभ्युपगमात्। मात्रपदेन कर्माद्याधिक्ये प्रथमा न भवेद
पि लिङ्गपरिमाणग्रहणाल्लिङ्गाद्याधिक्ये परिमाणाद्याधिक्ये च भवेत्याह। लिङ्गमात्राद्याधिक्य इति। यद्यपि लिङ्गमात्रे परिमाणमात्रे इत्येवोदाहरणं युक्तं तथापि
प्रातिपदिकार्थं विनाऽलिङ्गादिप्रवृत्तेरसम्भवादाधिक्य इत्युक्तम्॥ उच्चैरिति। पदत्वादिह रुत्वविसर्गौ भवतः। किं चास्य प्रथमान्तत्वात् क्रमम् उच्चैस्तरां वा स्व
गामुच्चैस्स्वमिति हि पूर्वकाय इति सूत्रे एतेन मयादेशयोर्विकल्पात्सिद्धिरपि कल्प्यम्॥ कृष्ण इति। यद्यपि नीले गुणद्रव्ये प्रथमान्ते लिङ्गमस्ति
यापि वाच्ये देवे भगवति नियतमुल्लिङ्गमेव इति भावः॥ ज्ञानमिति। भावे ल्युट्। तट इति। त्रिकपदे नियतलिङ्गं न प्रकृत्यर्थस्त्रिके पदे ते
यद्यपि प्रकृत्यर्थस्यापि तन्न लिङ्गस्य प्रातिपदिकार्थस्थितिकत्वान्न प्राप्नोति कार्थेत्यनेन गतार्थता॥ द्रोण इति। न चेह प्रातिपदिकार्थमात्रे इत्येव
प्रथमास्त्विति वाच्यम्। तथा सति परिच्छेद्यपरिच्छेदकभावस्य संसर्गविधया भानायोगात्। नामार्थयोरभेदसंसर्गस्य व्युत्पन्नत्वात्। व्रीहिरि
तो ज्ञातावेकवचनं। न किंविवक्षायां तु द्रोणौ व्रीहय इति भवत्येव॥ अभेदेनेति। न च प्रकृतिप्रत्ययार्थयोरभेदान्वयो दुर्लभः। प्रचतिपाकः। उप च
वं॰दा॰ द्राक् इत्यादौ सर्वत्र भेदान्वयस्य दृष्टत्वादिति वाच्यम्। नामार्थकतद्धितभेदान्वयस्य दृष्टत्वात्। ऐन्द्रं हविरित्यत्र हि इन्द्रदेवताकत्वविशिष्टबोधः। सर्वे
रेवाभ्युपगमादिति नावसर इति भावः। वचनं संख्येति। वाच्यं वा च पारसेदा ध्रुवतायेन तष्ठेव प्रवीचां पाणिन्यवक्तुरादिति भावः। अत्र शाब्दे वचनत्वेति। स
नैव चनग्रहणमित्यर्थः। वक्ष्यते हि सत्त्वमात्रग्रहणं कर्मविशेषविशेषविहितः कर्मणि द्वितीयेत्यादिभिर्विधीयते तेन कर्मादौ प्रथमायाः प्रसक्तेः
कर्मणि द्वितीयेत्यादिषु कर्मणि द्वितीयैव कर्तृकरणयोस्तृतीयैव। नानाविभक्तिरित्येवमस्यैव नियमाभ्युपगमात्॥ न चैकत्वेऽपि द्वितीयाप्राकृतं

करणे एव तृतीया। नान्यत्रेति प्रत्ययनियमपक्षे प्रथमैवाप्राप्तेः। अपि कर्मादौ प्रवृत्तिसंभवान्नात्र ग्रहणमावश्यकमिति वाच्यम्। प्रथमनियमपक्षे हि प्रातिप-
दिकार्थ एव प्रथमा नान्यत्रेत्यर्थपर्यवसानात् कर्मादौ प्रथमाया अप्रवृत्तेः। वचनग्रहणमपि व्यर्थं न केवला प्रकृतिः प्रयोक्तव्येति निषेधादेव प्रथमोत्पत्तिसि-
द्धेः। न चैवं द्विशब्दाद्बहुशब्दाच्चैकवचनं एकशब्दात् द्विवचनमित्यव्यवस्था स्यादिति वाच्यम्। अनन्वितार्थकविभक्तिप्रयोगायोगात्। अनुवाद-
कविभक्तिप्रयोगस्यान्याय्यत्वात्। गौर्वाहीक इतिवत् द्रोणशब्दस्य तत्परिमिते उपचाराद् द्रोणो व्रीहिरित्यपि सिद्धमिति मनोरमायां परिमाणग्रहणमपि
प्रत्याख्यातं। नन्वस्मिन्पक्षे द्रोणपरिच्छिन्नाभिन्नो व्रीहिरित्यभेदान्वयः। नामार्थयोरभेदान्वयात्। परिमाणं प्रत्ययार्थ इति पक्षे तु द्रोणरूपपरिमा-
णेन तत्परिच्छिन्नो व्रीहिरिति प्रत्ययार्थे नामार्थयोर्भेदान्वयस्तथा च फलभेदे कथं प्रत्याख्यानमिति चेन्न अत्राहुः। शाब्दबोधप्रत्युत केवलत्वस्य एवमिति
नाहत्य परिमाणग्रहणं प्रत्याख्यातं। अत एवोपगवादौ तस्येदमित्यनेनैवाण्प्रत्ययसिद्धेस्तस्यापत्यमिति किमर्थमित्याक्षेपो मत्वर्थीयेनैव
सिद्धेः परिवृतो रथ इत्यधिकारे पाण्डुकंबलादिनिरितीनिप्रत्ययविधानं किमर्थमित्याक्षेपश्च वक्ष्यमाणस्संगच्छते।। यदि तु सर्वत्रैव शाब्दबो-
धप्रयुक्तं वैलक्षण्यं स्वीक्रियते तर्हि बाधनार्थं कृतं भवेदिति समाधानस्याणो वा बाधनार्थमिति प्रत्ययविधानमिति समाधानस्य चैवं प-
र्यवसन्नेरिति। ननु क्वचित्पंचकं प्रातिपदिकार्थः क्वचित्त्रिकं क्वचिद्द्विकं प्रातिपदिकार्थो व्यवह्रियते ते एते पक्षाः केषामभिमताः कथं वा
मीमांसानुपपत्तिरिति चेत् अत्र व्याचख्युः। स्वार्थद्रव्यलिंगसंख्याकारकात्मकः पंचकः प्रातिपदिकार्थः दधि मधु तिष्ठतीत्यादौ विनापि विभक्तिं
प्रातिपदिकादेव तावतामर्थानां प्रतीतेः। वृद्धो वृद्धा वृद्धं कुण्डे इत्यादौ पदद्वयेपि विभक्त्यन्वयोपि प्रतीयते नैयता प्रकृत्यर्थत्वहानिर्द्योतकत्वेनैषामु-
पयोगादिति भाष्यकारो मन्यते। आदितस्तु चतुष्कमिति कैयटः। तत्रोपपदं सप्तमीस्थमित्यत्र चतुष्कपक्षे पंचकपक्षे वा प्रातिपदिकार्थ इत्यभि-
धानात्। आदितस्त्रिकमिति वृत्तिकारः। अन्वयव्यतिरेकाभ्यां संख्याकारकयोः विभक्त्यर्थत्वनिश्चयात्। यद्यपि दधि मधु तिष्ठतीत्यादौ विना-
पि विभक्तिं संख्याकारकं च प्रतीयते नेयता वृद्धो वृद्धा इत्यादावपि विभक्त्यर्थत्वं हीयते। न हि गर्गा इत्यादौ विनापि यञमपत्यत्वं गम्यते इति तद-
पि प्रकृत्यर्थः। न चात्र विभरित्यादौ अन्तरेणापि प्रत्ययं कर्ता प्रतीयते इति। भेत्तेत्यादावपि कर्तापि प्रकृत्यर्थ एवेति युज्यते वक्तुं। अतस्त्रिकमेव प्रा-
तिपदिकार्थः संज्ञाकर्मादयस्तु विभक्त्यर्था इति लिंगं टावादिवाच्यमिति पक्षे। आदितो द्विकमेवेत्यन्ये। तत्र स्वार्थो विशेषणं। द्रव्यं विशेष्यं। लिंगं
स्त्रीत्वादि। संख्या एकत्वादिः। कारकं कर्मादिः। संबोधने च। मात्रग्रहणान्नत्प्रत्याख्यानपक्षेपि प्रातिपदिकार्थ एव प्रथमेति नियमात् सं-
बोधनाधिक्ये प्राप्ते आरंभः। इह संबोधनं प्रकृत्यर्थं प्रति विशेष्यं क्रियां प्रति विशेषणं। तथा च व्रजानि देवदत्तेत्यादौ एकतिङ्वाक्य-
मिति वाक्यत्वसिद्धेः आमंत्रितस्य चेति घातो भवति। क्रियाप्रत्यविशेषणत्वे तु भिन्नवाक्यत्वान्नेन तत्सिध्येत्। समानवाक्ये निघातयु-

अदस्मदेशात्प्रवक्तव्या इति वार्त्तिकात् तत्पाचोक्तं। संबोधनपदं यच्च तत् क्रियाया विशेषणं। व्रजानि देवदत्तेति निघातो। तत्र यास्यतीति
एवं वरामे मीमांसाहीति वाक्यस्य रामसंबंधिसंबोधनविषयो मत्कर्मीकरणमर्थः। व्रजानि देवदेवदत्तेत्यत्र तु देवदत्तसंबंधि संबोधविषयो धावि
धावि विषयो मत्कर्तृकगमनमर्थः। इति प्रथमा। कर्तुरीप्सिततमं कर्म। कर्तुरिति किं स्य च वर्त्तमान इति कर्तरि षष्ठी। आप्नोतेस्स न
न्नन्तादिच्छायामाप्तुमिष्यमाणतमं। अत्र लोपो ऽस्य स इत्यभ्यासलोपः। मतिबुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तः। मतिरिह इच्छा न तु बुद्धिः पुनर्बु
द्धिग्रहणात्। ततो ऽतिशायने तमबिष्ठनाविति अतिशये तमप् एवं च कर्त्रा आप्तुमिष्यमाणतमं कर्म इत्यर्थः। कर्त्तावधातुः प्रत्यया
श्रयः स च केनाप्तुमिष्टमितीति किं करणं कर्त्ता पया विशेषणत्वे तेन व्यापारेणात्यर्थाहलेभ्यते तदेतदाह क्रियया ये तिप्रत्यये ना पश्यिते
वर्त्तमानत्वविवक्षा न विवक्षितं तेन कटं कृतवान् करिष्यतीत्यादि सिद्धं। कारके इति। एतच्च कारके इत्यधिकोरालभ्यते। तत्रेहि
व्यत्ययेन प्रथमार्थे सप्तमी प्रतिसूत्रं वाक्यं भित्त्वा कारकसंज्ञानेन विधीयते। तथा ध्रुवमपायेपादानमिति ध्रुवं कारकं संज्ञं स्यात्। ततः अपादानमुक्तं
कारकमपादानसंज्ञं स्यात्। पुनः कारकशब्दानुवृत्तिसामर्थ्याद्धि शेषसंज्ञाभिः सह समावेशसिद्धिः। तेन संबेरम इत्यत्र अधिक
क रणत्वात्सप्तमी कारकत्वात् गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरः सिध्यत्यन्यथा तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्र
कृतिस्वरः स्यात्। न चात्रोपपदस्वरेणन्यथासिद्धिः प्रकर्षार्थं वक्ते कर्णयोरिति निर्देशात्। यतिपदे कस्योपपदत्वे पि सप्तम्यन्तस्यात्याता
तापद्धतिदर्शयादिस्वरेणैवातो ऽन्तलसिध्यतितया प्रत्ययस्य चर्यैतरत्र च स्वतन्त्रोपादानात्। अपि यथादि स्वरेण तत्सि
द्धिरित्याहुः। अन्वर्थी चेयं संज्ञा करोतीति कारकमिति। तेन ब्राह्मणस्य पुत्रं पश्यतीत्यत्र क्रियान्वयिनो न भवति ब्राह्मणो ह्यत्र पुत्रविशेषणेन
तु क्रियान्वयीति। पयसेति। भुजिक्रियां प्रति पयसः पकृष्टोपकारकत्वे ऽपि ओदनपयो आ ईप्सिततमः पयसैक्तसंस्कारकरणं। न पयसो के
वलपयसः पानेन संतुष्यति किंतु तत्संस्कृतोदनेनापत्तु पयप्रव ईप्सिततमस्य भवति तदा कर्मत्वं भवत्येव पयः पिबतीति। कर्मेत्यनुवृत्ता
विति। अधिशीङ्स्थासां कर्मेति सूत्रात्। अनभिहिते ननु बहुपटुरित्यादौ बहुच प्रत्ययेनोक्तार्थी बालकं लवा इत्यो यथा न प्रवर्त्तेतातया क्रियते
कटइत्यादावपि तिङादिभिरुक्तार्थत्वाद्द्वितीया न भविष्यति। किं च कटं करोतीत्यादौ सावकाशा द्वितीया कृतः कटइत्यादेस्तिरवका
शया प्रथमया बाध्यते न च वृद्धः स्तुत इत्यादि प्रथमायामवकाशः। तत्रापि प्रतीयमानां मस्ति क्रियां प्रति कर्तृत्वेन तृतीयाप्रसंगात् अ
पोच्यते नीलमिदं तत्पुरस्कृतमित्यादौ विशेषणान्तरनिवृत्तितात्पर्यके अस्तिक्रियाया अनावर्यकत्वात् प्रथमायाः अस्ये वावकाशइ
ति तर्हि उभयोस्सावकाशत्वे परत्वात् [illegible] तया चानभिहिताधिकारो ऽस्य वेतिचेत्। अत्राहुः। ह्यस्वा विभक्त्यर्थ शतिपदेसत्रा

रंभन्यावषपकः तथाहि सूत्रारंभे कर्मणि द्वितीयेत्यस्यानभिहितेकर्मणि यदेकत्वं तत्र द्वितीयैकवचनमित्यर्थः सूत्रानारंभे च कर्म
णि यदेकत्वं तत्र द्वितीयैकवचनमिति द्विवाक्यार्थं स्यादिति कृतः कटं इत्यादौ क्तेन कर्ममात्रोक्तावपि तदेकत्वस्यानुक्ततयारम
दुर्वारः स्यात् तेन च परत्वात् प्रथमैव स्यात् इति वाच्यम् । कर्त्तव्यः कट इत्यादौ ततोऽपि परत्वेन कृद्योगलक्षणषष्ठीप्रसंगात् कार
कविभक्त्यर्थं इति पदे तु कारकस्य क्तप्रत्ययादिनैवोक्तत्वात् प्रातिपदिकार्थप्रवृत्तायाः प्रथमायाः इकत्वादिबोधनसंभवाद्द्वि
मादिविभक्तेः अप्रवृत्त्यादनभिहित इति सूत्रे वृत्त्याख्यातेमाकरे इति । कारकप्रातिपदिकार्थं इति पदे त्वनभिहित इत्यस्याद्यो
त्प इत्यर्थः तथा च क्तप्रत्ययादिभिरद्योत्यकर्मणि द्वितीयेत्यादिवाक्यार्थः तत्राख्यकेन द्योतिते द्योतकांतरेण प्रवर्तते इ
त्यभ्युपगमे त्वनभिहिताधिकारो नातीवोपयुज्यते इति दिक् ॥ हरिंभजतीति । भजनक्रियया हरेः प्रीतेरुत्पादनात् प्रीत
विशिष्टतयाऽप्यत्वेन हरिः कर्म तद्विशिष्टं भजते वाक्यार्थः हरिनिष्ठप्रीत्यनुकूल एकदेवदत्तकर्त्तृकादिनिष्ठो वर्त्तमानो व्या
पार इति निष्कृष्टोऽर्थः । हरिः सेव्यते इत्यत्राप्यवक्रियाप्रधानमाख्यातमिति सिद्धांतात् । धातूपस्थिता क्रिया तिङर्थप्र
ति विशेष्यम् । ननु कृदर्थप्रतीव विशेषणमिति विहितस्यार्थः अत एव पाचको व्रजतीति च पचति व्रजतीति नैकं वाक्यं पा
न ककर्तृकर्तृकं गमनं हि पाचको व्रजतीत्यस्यार्थः । एककर्तृकापचिक्रिया एककर्तृका गमनक्रियेति पचति व्रजत्योः इष्य
प॰ ते वार्थः एवं च प्रथमांतविशेष्यवाबोध इति नैयायिकोक्तो बोधो भाष्याद्यनुसारिभिर्नादर्त्तव्यः तन्मते हि पाककर्त्ता व्रजनानु
कूलकृतिमानिति पाचको व्रजतीत्यस्यार्थः पचति व्रजत्येतत्पाकानुकूला कृतिर्व्रजतीत्यस्यार्थ इत्येवं रूपेण वाक्यार्थ
पर्यवसानात्तस्य च भाष्यादिविरोधात् किंच हरिं भजति देवदत्तः हरिः सेव्यते देवदत्तेनेत्यत्र च एकरूप एव शाब्दबोध इत्यु
क्तं नैयायिकानां तु मते भिद्यते एव हरिनिष्ठप्रीत्यनुकूलकृत्याश्रयो देवदत्तः देवदत्तनिष्ठकृतिजन्यप्रीत्याश्रयो हरिरित्युभय
त्र भेदेन वाक्यार्थपर्यवसानात् तस्मात् प्रथमांतविशेष्यकबोधो भाष्याद्यनुसारिभिर्नादर्त्तव्य एव यास्कोऽप्याह भावप्रधानमाख्या
तं सत्त्वप्रधानानि नामानि इति पश्य मृगो धावतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रियायाः कर्म प्रधानं तु दृशिक्रियैव उक्तं च हरिव
तं हि यथानेकं तिङंतस्याविशेषणं तथा तिङंतमप्याहुस्तिङंतस्य विशेषणमिति न च लौकिकप्रयोगेषु तिङंतस्य तिङंतविशेष
णत्वं दुर्लभमिति मंतव्यम् पुरीमवस्कंद लुनीहि नंदनमिति मा ब्रूहि कस्य पुर्यवस्कंदने नंदनलवनादिरूपा [illegible] स्य प २
क्रियेत्यर्थ इति हस्तवय्योरन्यतरस्यामिति सूत्रे मूले स्पष्टं भविष्यमाणत्वात् एवं पचति भवतीत्यस्य पचक्रिया भवतीत्यर्थो भा

ऽयमते बोध्य इति दिक्। अभिहिते त्विति। न च स्वयं पक्त्वौदनं भुंक्ते इत्यत्रापि द्वितीया न स्यादिति चेत् मैवं इहापि पचिभुजिनिरूपिते द्वे
कर्मत्वशक्ती तत्र प्रधानीभूतभुजिक्रियानिरूपितां अभिहितां शक्तिमादाय द्वितीयायोत्पत्तेः अत एव आसने आस्ते इत्यत्र सकर्म
संज्ञं कृते ल्युटा अधिकरणत्वसामान्ये विवक्षिते तो यस्याश्च क्रियानिरूपिताधिकरणत्वस्यानुक्तत्वात् शत्व इति प्रागाद्भवन्यतेवश
त इति यता प्राप्तानंद इति। इह गत्यर्थाकर्मकेति कर्तरि क्तः। आनंदकर्तृकं प्राप्तिकर्मीभूत इत्यर्थः। एवं दुःखं प्राप्तेनेति तस्य फ
लमाह कश्चिन्निपातेनेति विषवृक्ष इति संवर्ध्य इत्यत्र छेत्तुमित्यत्र चार्थाद्विषवृक्षमिति गम्यते इति ध्येयं। उच्यते इत्यर्थ इति
एतेन निपातानां द्योतकत्वमेवेति नियमो नास्तीति ध्वनितं॥ तथायुक्तं तथायुक्ते कथं युक्तमिति जिज्ञासायामाह द्वेष्यितत
मवदिति सूत्रे च शब्दोऽरविशब्दार्थे वर्तत इति ध्वनयन्नाह अनीप्सितमपीष्यितादन्यदनीप्सितं तस्मिन्निति यदुद्दासोऽपि ते
न यदुपेक्ष्यं यच्च द्वेष्यं तद्द्वयमपि इह गृह्यत इत्याशयेनोदाहरति। ग्रामं गच्छन् तृणमिति। यथा स्पृश्यमानस्य तृणस्यादे
रीप्सितस्य क्रियायोगस्तु न स्वसंयोगादिकफलधारत्वात्तयोऽवानीप्सितस्य तृणादेरिति भावः। इहापि ग्रामं गच्छतृणस्प
र्शनं नांतरीयकं तृणस्यानीप्सितत्वात् यदा तु तृणमीप्सिततमं भवति तदा पूर्वेणैव सिद्धं उपेक्ष्यं च नोपेक्षा बुद्धिविषयः न
दीकूलं कषतीत्यचेतने तदसंभवात् किंतु यत्रेष्टानिष्टयोरभावस्तदुपेक्ष्यमिति विवक्षितं विषमिति अत्राविवेकेऽयमप्यो
दनवद्भुजिना संबध्यते कर्म ननु य एव पुरुषो व्याध्यादिनापीड्यमानो मरणमेव श्रेयो मन्यते तस्य विषमीप्सितमेव यो
पि भूत्वा भुंक्ते तस्यापि गुडादिवद्दुःखाध्यवसायमानं विषमीप्सितमेव कथं मन्यथ प्रवर्तेत तस्मादिदमुदाहरणम
युक्तमेवेति चेत् अत्राहुः। यदा कश्चिन्मरणकातरोऽपि वैरिणा निगृह्यमाणो विषं भुंक्ते तदेदमुदाहरणमपि तु इति अनीप्सि
तस्यापि प्रतिपत्त्यर्थं तथायुक्तमित्यारंभादेवेष्टसिद्धेः॥ स्यादेतत्। धातूपस्थाप्यफलाश्रयः कर्मत्वेवास्तु किमनेन सक
र्तुरीप्सिततममित्यादिसूत्रद्वयकथनेनेति चेत् अत्राहुः। अग्नेर्माणवकं वारयतीत्यत्र वारणार्थानामीप्सित इति सूत्रे
ण माणवकस्यापादानत्वं प्राप्तं तद्बाधाय कर्तुरीप्सिततममिति वक्तव्यमेव एवं चेदुभयोरपादानत्वयोः संग्रहार्थं तथायुक्तमि
त्यप्यावश्यकमेवेति अकथितं च केनाक्रियाविति मित्याकांक्षायामाह। अपादानादिविशेषैरिति। अपादानं संप्रदानम

धिकरणं कर्म करणं कर्त्ता हेतुरित्येते विशेषैरित्यर्थः अविवक्षितमिति अपादानादिविशेषैरविवक्षायां तु गोर्दोग्धि पयः व
लेर्याचते वसुधां व्रजेऽवरुणद्धि गामित्येवं पचः ग्रादयो एव भवंतीति भावः एतेन पाणिना कांस्यपात्र्यां दोग्धि इत्यत्रा
तीय करणाधिकरणयोरतिप्रसंगस्तयोः क्तदण्डेन करोति कटैत्यादिरवकाशो दुहादि परिगणनादित्यादौ पोनिर
स्तः करणाधिकरणसंज्ञयोरिह विवक्षितत्वात् यदि तु तत्र अकथितशब्दोऽप्रधानपर्याय इत्यभ्युपगम्यते तदा स्यादेवा
यमाह्रैयोनल्वन्यथा। कारकमिति तात्तन अब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्र नातिप्रसंगः दुह्याचिति दण्डदाण्डति चुरादिः इ
हतदरिद्रग्रहणार्थो ननु निग्रहार्थः प्रच्छीत्यागंतु केनेकारेणामि निर्देशो नत्त्विकारप्रश्लेषेति संप्रसारणप्रसंगात् कर्मयुगिति॥
कर्मणायुज्यते कर्मयुक् सत्तरद्विषेत्यादिनाक्विप् कर्मणा युज्यत इति मुख्यकर्मणा सह क्रियया संबध्यमानं कारकमेवापा
दानादिविशेषैरकथितं सत्कर्मसंज्ञकं भवतीत्यर्थः एतेन दुहादीनां द्विकर्मकत्वं स्फोरितं अन्ये त्वाहुः कर्मयुगित्यत्र कर्मशब्देन
क्रियोच्यते इति तेन क्रियान्वयीत्यर्थः। परिगणनमिति। तेन नटस्य शृणोति गां पाययतीत्यादौ नातिप्रसंग इति भावः इदंहि गा
वं पाकर्मकं नटसंबंधिस्त्रवणं वाक्यार्थः तेन क्रियान्वयित्वान्नटस्य कारकत्वमस्त्येव। गां दोग्धि इति। पयः कर्मकं गोसंबं
धि दोहनमर्थः पयोरूपमुख्यकर्मकर्त्तृ रिक्तितमत्वात्। गोस्त्रपयस्तो। भत्तिमित्तत्वमात्रेणोपादानत्व विवक्षितायामपादा
वेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति। तदुक्तं हरदत्तेन यद्यपि गोरवधिभावोस्त्येव तथापि यस्मात् संबध्यते ते=
तदा गोशब्दात् षष्ठ्येव भवतीत्यपि बोध्यं यत्तु प्राचाहुस्त्वा व्याख्या रुधिप्रच्छिचिब्रूयाशासुजिकर्मयुक्तानीह दुहां पंचकं वस्
दंडजहत्मुष्यचिकर्म भागि तिपठितं तत्र गतेःपाठो प्राणिकः इतरेषां तु द्विकर्मकत्वं यद्यपि प्रामाणिकं तथापि
संदेहो शुद्धिः तथाहि दुह्यादीन्निरादीअस्वैरामेण नपठिता सार्वदेशकालाद्यभावे भ्यो द्वितीयेति केचिदितुक्ता
नदीमास्त इत्यादकदाहृतं तदसंगतं ग्रामसमूहाकुर्यादिरेवण्देशो गृह्यते नप्रदेशमात्रं तेन ग्रामं स्वपितीति ३
नभवतीत्याकारात् अद्धेति चन्दूनं अधानं स्वपितीत्यपि प्रसंगात् अतएवाकारे अध्वगंतम्प्रत्वेन विवक्षितः गंतव्यत्वे
नप्रसिद्धो नियतपरिमाणः क्रोशादिरिति व्याख्यातं द्वितीयेत्यपि अस्तंते कर्मसंज्ञाया अविवक्षितत्वात् कर्मणित्वादयोगस्तु

प्राप्नोत्यात्मनो यो हरिरात्मनस्तस्यापयतिस्स स हरिर्मे गतिरित्यन्वयः ननु शास्त्रेण मनेन कर्मत्वे कृते कर्मणि इप्सिततमः न
नु कर्तुरिति कर्तुरीप्सिततमत्वाभावात् स्वर्गस्य कर्मत्वं न स्यात् अत्र केचित् गतिबुद्धीति कर्मत्वस्य विहितत्वेन ततः प्र
वृत्तमेव धात्वर्थव्यापारप्रयुक्तं कर्मत्वं स्वर्गस्यानिर्वाधमित्यदो वदति अन्ये तु कर्तुरीप्सिततममित्यत्र कर्त्तृग्रहणं स्वतंत्र
स्योपलक्षणं स्वातंत्र्यं च धातूपात्तव्यापाराश्रयत्वमेव तच्च प्रयोजककर्तृसन्निधाने पि प्रयोज्यस्यास्त्येवेति न काप्यनु
पपत्तिः न च स्वतंत्रे संकेतितस्य पदस्य स्वतंत्रत्वलक्षणा न संगच्छते एकस्यैकस्मिन्नेव शक्तिलक्षणे भयाभ्युप
गमस्य शास्त्रकारासंमतत्वादिति वाच्यं संज्ञांतरानुपहितस्वतंत्रे संकेतितस्य संज्ञांतरोपहितानुपहितसाधा
व रणे स्वतंत्रे लक्षणाभ्युपगमे वाधकाभावात् अत एव णिधातोर्णिचेशक्तिः प्रकृत्यर्थलक्षणाशरूपेण शक्यादन्ये
न ज्ञाते भवति लक्षणेति तेन प्रजयतीत्यत्र प्रशब्दो द्योतकः प्रकृत्यर्थस्य जितोरेवार्थ इति नैयायिकोक्तिः संग
च्छते नापि कर्तृपदस्य स्वतंत्रलक्षणायां प्रमाणाभावः शंक्यः प्रधानेकर्मण्याख्येये लादीनाहुर्द्विकर्मणां अप्रधा
ने दुहादीनां णिस्तु कर्मणाप्यते कर्तुश्च कर्मण इति वदतो भाष्यकारस्यैव प्रमाणत्वात् न हि लक्षणां विना णिजंतानां द्विकर्तृता कर्म ५
लभ्यते येन ण्यंते कर्त्तुरिति वचनं सावकाशं स्यादित्याहुः निवर्त्योरिति यद्यप्यनपोप्राप्यत्वमपि नगातिस्याविग
तिरपि विशेषणीभूयप्राप्यमध्ये प्रविष्टेत्येतावन्मात्रेण प्राप्तिमत्वात् प्रतिषेध उक्त निमित्तेति । तिर्यतापस्तुत्रेर
कः नल्साराधिरेवे तेन वाहयतीव लीवर्दान्यवानिति सिध्यति अस्मादेव भाष्योदाहरणाद्वहियोगम
प हरतीति इति न्यायोऽत्र न स्वीक्रियते । अनिषेध इति । प्रयोजनः कर्मेति वक्तव्यमिति कलितोर्थः ये स्तु प्राप्यणंग
ति शब्देन गृह्यते तेषामनावश्यकमिति वेद्यं अस्तु इति । नियंतापाजितायंतास्तुतः हृतावसारथिरित्यमरः ६
प्रत्यवसानार्थत्वात्कर्मत्वे प्राप्ते निषेधमाह आदिखाद्योरिति । आदभक्षणे स्वादभक्षणे भावात् आदीतिपठ्यते

दिशासयते मासम् इत्यादिप्रयोगाभावप्रसंगात् केचित्तु त्तिस्समतदोर्बल्यसूचनायेति कथंचिद्व्याख्याय पूर्वोक्तदोषपरि
हारेपि तृदीमाहेरे इत्युदाहरस्यासांगत्यदोषस्तदवस्थ एवेति ध्येयं। गतिबुद्धि। प्रत्यवसानभक्षार्थशब्दकर्माकर्मकाणामिति। श
ब्दः कर्मकारकं येषामित्यर्थः कर्मशब्दो ह्यकारकपरः नतु कर्तरि कर्मव्यतिहारे इत्यत्रेव क्रियापरः कृत्रिमे कार्यसंप्रत्य
यात् कर्मणस्तत्त्वसामर्थ्याच्च अन्यथा हि गतिबुद्धिप्रत्यवसानशब्दार्थकर्मकाणामित्येव ब्रूयात्। अणौ यः कर्तेति।
अनुत्पन्ने णिचि शुद्धधातुवाच्यां क्रियां प्रति यः कर्ता स एव तद्धातुवाच्यां क्रियां प्रति कर्मसंज्ञः स्यादित्यर्थः। नियमा
र्थमेतत्सूत्रमिति प्राचः। णिजर्थेनाप्यमानत्वस्य यदि भवति तर्हि गत्यर्थादीनामेव कर्तुरिति तेन पाचयति देवदत्तो य
ज्ञदत्तेनेत्यत्र प्रयोज्ये कर्तरि प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपायत्वेनावस्थानात्तृतीया सिध्यति। उक्तं च। गुणक्रिया
यां स्वातंत्र्यात्प्रेषणे कर्मतां गतः। नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते इति कर्तुः स्वधर्मेण तृतीयेत्यर्थः ननु णिजर्थं
प्रति कर्मत्वं बाधित्वा प्रकृत्यर्थपरत्वादेव हि सिद्धं अंतरंगत्वाच्च स्वकारकविशिष्टा हि क्रिया णिजर्थेन संबध्यते हेतुमति णि
ज्विधानात्कर्तुः प्रयोजकस्य हेतुत्वात् अत एवोपजीव्यापि कर्तृसंज्ञा एवं च परत्वादंतरंगत्वादुपजीव्यतयापि च प्रयो
जकस्य कर्तृत्वं गत्यादेर्विधितो वितायद्यपि विधिपक्षेपि लक्ष्ये निर्बाधमेव तथापि नियमसूत्रमिदमिति प्राचां म
पाविरुद्धं इति चेन्न अत्राहुः। णिजर्थस्य शाब्दप्राधान्यं पुरस्कृत्य प्रधानानुरोधिन्याः कर्मसंज्ञायाः प्राबल्यादिप्रतिपद्य ए
व नास्तीति परत्वात् कर्तृत्वसिद्धिरित्येव तन्न हंगहृच्चे अंतरंगत्वोपजीव्यत्वे अपि प्रधानं प्रति प्राबल्यं न प्रयोजयतः।
ततश्च नियमार्थत्वोक्तिः प्राचां निर्बाधैवेति गत्यादिष्वेतान् क्रमेणोदाहरति। शत्रूनिति। अत्र शत्रवः स्वर्गमगच्छन् तान्
श्रीहरिः स्वर्गमगमयत् इति गमेरणौ तावस्थायां शत्रवः कर्तारस्त एव ण्यन्तावस्थायां कर्माभवन् स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं
तदनुकूलो यन्निष्ठो व्यापारः स श्रीहरिः स्मिंगातिरितिवाक्यार्थः। एवमग्रेपि ऊह्यं। वेदार्थमिति। ते स्वकीयावेदार्थमविदुस्ता
न् श्रीहरिः वेदार्थमवेदयत् तथा देवा अमृतमश्नन् तानाशयत् विधिर्वेदमध्यैत तं ब्रह्मा एवं वेदमध्यापयत् दपाठयत् सलिले

क्तः तदयुक्तं अयतेर्निषेधस्य निर्मूलत्वेन अणौ कर्तुर्णौ कर्मत्वस्य तत्रेष्टत्वात् क्रंदत्सैंहे जो क्तः शब्दक्रियत्वेपि शब्दः क
र्मकारकं नेति प्राप्तेरेवाभावेति स्थिते मतोरमायां यादृदपि श्रुग्रहणं दर्शनामिति कर्मत्वमुक्तं तत्र दृशिग्रहणं प्राप्याणि
कमेव ग्रहणमिति क्तः शब्दकर्मत्वात्सिद्धत्वाहे द्विकर्मत्वप्रयुक्तं निग्रहंते जनकोधनुस्तदिति भट्टिप्रयोगस्य अप्या
चितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेति कालिदासप्रयोगस्य चानुगुणंतया पाणिग्रह नाम संमतमेव
अत एव तं धनुराजिग्रहत बोधितवान् सुतां ग्राहयितुं मुख्यात्वेन बोधयितुमित्येव मुक्तप्रयोगं समर्थयां चक्रि
रे नु च बुध्यर्थत्वं विनापि यथा श्रुतेर्थे एवं गृहेर्द्विकर्मकत्वमस्तीति वाच्यं तथा हि सति जाया प्रतिग्राहिता गंधमाल्या
मित्यत्र क्तप्रत्ययेनाभिधानं प्रयोज्यकर्मीभूत धेनोः स्यात् न तु गंधमाल्यकर्मणः एवं ते कर्तृस्थ कर्मण इत्युक्तेः
जायाया प्रेरिता हि धेनुं गंधमाल्ये प्रतिगृह्णाति इति भवत्येव धेनुः प्रयोज्यकर्म ततश्च जायाप्या गंधमाल्ये प्रतिग्राहि
तामिति स्यात् क्तप्रत्ययानभिहितत्वेन गंधमाल्यकर्मणि द्वितीयापाः अप्रवृत्तेः सिद्धांते तु जायाया प्रतिग्राहिते
गंधमाल्ये च येति विग्रहः द्विकर्मकत्वाभावेन गंधमाल्यस्यैव क्तं क्तप्रत्ययेनाभिहितत्वात् पयेति तृतीयां तु
णिजर्थप्रति जायायाः कर्तृत्वे णिजणि अकृत्यर्थप्रतिग्रहं प्रति धेनोः कर्तृत्वादुपपद्यते एवं चेह जाया निष्ठ प्रेरणविषयी
भूतं गंधमाल्यकर्मत्वं यत्प्रतिग्रहणं तत्कर्त्रीमिति हृत्यर्थः यद्यपि धेनुकर्तृकं जायानिष्ठ प्रेरणविषयीभूतं यत्प्र
तिग्रहणं तत्कर्मीभूते गंधमाल्ये इति विग्रहार्थस्तथापि अन्यपदार्थान्तर्भावेणैव विशेषणविशेष्यभावे वैपरीत्येन
पूर्वापरीभावः कल्प्यत इति नास्य त्रानुपपत्तिरिति दिक् आहृकोः। हृच करोतेश्च हृ करोतेः प्रोरिति विग्रहः हृ अ कु अ
हृक्रोरिति वा। अभ्यवहार्यविकार्ययोः यथा मांते न परिनिष्ठितविभक्त्या वा विग्रह इति सिद्धांतात् गतीत्यादिना ५
नेते तेन उभयत्र विभाषेयं। अभ्यवहार्यस्य हृतेर्भक्षणं विकार्यस्य करोतेश्चाकर्मकत्वात् गतिबुद्ध्यादिना
विकार्यस्य

तेभ्य एतावस्यानुकरणे मितिबोध्यं। आदयतीति। इह तु निगरणचलनार्थेभ्यश्चेति परस्मैपदनियमो न प्रवर्त्तते अत्तेः प्रति
षेध इति तस्य निषिद्धत्वात् तेनाकर्त्रभिप्राये क्रियेफले शेषात्कर्त्तरीति परस्मैपदं। कर्त्रभिप्राये तु णिचश्चेत्या
त्मनेपदं भवत्येवेति बोध्यं। भक्षेरिति। ननु गतिबुद्धीति सूत्रेणाणौ कर्त्तुर्णौ कर्मत्वं विधीयते न तु णौ कर्त्तुरिति प्राप्ते
रेवाभावान्निषेधोपि व्यर्थ इति चेदत्राहुः हेतुमण्णिजंते विधिरिति निषेधोप्यणावित्यर्थसन्निधानाद्धेतुमण्णिजवि
षय एव तेन चुरादिणिजंते विभक्षयतौ प्राप्तिसत्वात् प्रतिषेधोपसंख्यात इति। भक्षयतीति। वलीवर्दस्य भक्ष हे
यंति तान् भक्षयतीत्यर्थः क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसाक्षेपात् तस्यामवस्थायां तेषां चेतनत्वात् नस्य
तिप्रभृतीनामिति। जपजल्पव्यक्तायां वाचि पुत्रो धर्मं जल्पतीत्यण्यंतावस्थायां पुत्रः कर्त्ता ण्यंतावस्थायां कर्माभावा
त् तथा पुत्रो धर्मं भाषते तं भाषति देवदत्तः न च जल्पतिभाषत्योः शब्दक्रियत्वेन गतिबुद्धिसूत्रेणैव सिद्धे उपसं
ख्यानमिदं व्यर्थमिति चेन्मैवं शब्दकर्मणामित्यस्य शब्दः कर्मकारकं येषामित्यर्थात् अन्यथा वेदमध्या
पयद्विधिमित्यादेरसिद्धिप्रसंगात् एवं पुत्रो यत्किंचिल्लपति तं विलापयतीत्यादावप्यूह्यं। स्मारयतीति। अध्यय ने॰
नार्थकस्यैव स्मरते घटादयो मित इति मित्वं न चिंतार्थकस्येति भावः। देवदत्तेति। स्मरत्येनं वनगुल्म इत्यत्र तु णि
रणाविति सूत्रे भाष्यप्रयोगादेव कर्मत्वं बोध्यं। शब्दायतीति। शब्दं करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ्। ततो हे
प तुमण्णिच्। धात्वर्थसंगृहीतेति। एतेन शब्दायति सैनकैरिपूनिति कर्मत्वप्रयुञ्जनात् प्रत्यासत्तेः। न त्वविवक्षितकर्मणो
पि इति। यथा ल्लः कर्मणि चेति सूत्रे ऽविवक्षितकर्मणोप्यकर्मका इति गृह्यंते तथैवेहापि यदि गृह्येरन् तदाश्रो
दनादिकर्मणोऽविवक्षायां पाचयति देवदत्तमिति स्यान्न तु देवदत्तेन पाचयतीति एवं गत्यर्थाकर्मकेति सूत्रेप्यविवक्षि
तकर्मणोऽकर्मका इति न गृह्यंते देवदत्तवान् पक्कवानित्यर्थे दत्तः पक्करस्तापयतेः पक्तुप्राचाम्रपक्वदशब्दापद्धे ज्ञाने तु

अलोकर्तृलौकिकमते व्याप्ते अर्थांतरे चानयोः सकर्मकत्वाद् अत्रापि अस्यारंभात् अत्रापि तावुदाहरणमाहाहारतीति। हरति
करोतीति वा कटं भृत्य इत्यर्थः एवं तावदस्यामप्यभृत्यः कर्ता एव एवं तावदस्यामपि कर्मीभूत प्राप्ते तदुदाहरणं तूर्णमभ्यवहारयति सैंधवैः तु य
एणमभ्यवहारयति सैंधवान् विकारयति सैंधवान् विकारयति धैवैरिति बोध्यं ननु यदि गतिबुद्धीत्यादिरिह नानुवर्तते तर्हि तदेः
स्यात् तत्रैव माननपश्यामइतिचेन्नैव नवेति विभाषेति सूत्रे उभयत्र विभाषा सूत्रभाष्यकृता अस्यापि सूत्रस्य गणितत्वे
नोक्तत्वं कात्यायनवतारात्॥ अभिवादीति वदसंदेशवचने चुरादिराधृषीयः अभिपूर्वं कत्वा नमस्कारयति अभिवाद
यतेरप्राप्ते इदं श्लोकव्याख्यायां विकल्पः अभिवदति देवं भक्तः स प्रेरयत्यन्यः अभिवादयते णिचश्चेत्यात्मनेपदं परस्मैपदे तु अ
भिवादयति देवं भक्तेन तथा पश्यति देवं भक्तः दर्शयते देवं भक्तं नइत्यादि। अभिनिनेरल्पाच्चतरत्वेन पूर्वनिपाते कर्तव्ये
विपरीतोच्चारणमीदृशं संघातविवक्षार्थमित्याहुः संघातपूर्वस्येति तेनेह न निविष्टे यदि मूकशिरवापदे इति कश्चित्तेति एष्वर्थेष्वभि
निविष्ठानामिति समर्थसूत्रस्य भाष्यप्रयोगात्रमाननमिति भावः उपान्वध्याङ्वसः उपान्वत्तु विकरणाद् लुग्विकरणं वली यइति वसति वासे
इति भौवादिक एव गृह्यते न तु वस आच्छादने इत्यादिक इत्य[illegible] अभिप्रेत्य शपा निर्देशमाह उपादिपूर्वस्य वसतेरिति वसे
रश्यर्थस्य प्रतिषेधइति वार्तिकमर्थतो व्याचष्टे अभुक्त्यर्थस्येति वार्तिके अर्थशब्दो निवृत्तिवचनः भोजननिवृत्ति
वाचकस्य वसेराधारः कर्मेत्यर्थः वने उपवसतीति कथं तर्हि गत्यर्थाकर्मकेति सूत्रे हरिदिनमुपोषित इत्युदा
हरणं संगच्छते इति चेत् अत्राहुः वसेरत्र स्थितिरर्थः भोजननिवृत्तिस्त्वार्थिकीति न दोष इति उपपदविभक्तिमाह
उभसर्वतसोरित्यादिना उभसर्वयोस्तसौ उभसर्वतसौ तदंतयोर्योगे द्वितीया कार्येत्यर्थः प्रकृतिद्वित्वेन तसोरि
तिद्वित्वनिर्देशः अत्र उभशब्दाद्दयच् न कृतः अनुकरणशब्दत्वेन असंख्यावाचित्वात् तथा च उभशब्देने
उभयशब्दो लभ्यते केवलात्परत्र तसोरंभा बाधित्येके वक्तव्य तसिर्विनि विषये अयच् प्रवृत्तावपि उभयशब्दाद्धि हि
तोपसंहारमस्ते वेदि यथाप्रकृतं-साधितिमनोरमायां स्थितं द्विगितिद्विगशब्दो यो योगे द्वितीया कार्येत्यर्थः अत्र मा

चेः धिगित्यविभक्तिनिर्देशो नवित्यप्रमाहेतिवत् इत्याहुः तन्न तथा सत्यपदांते तथा दृष्टांते लोमशः शाकल्यस्येव वदा।
एंतिके जग्धस्याप्यप्रवृत्तिप्रसंगात् न चापगकारांते एवास्त्विति शक्यं कस्य च इदिति सूत्रे घ किंचित्तूदाहरणस्याप्र
गतिप्रसंगात् कस्य च इत्यत्र न हि कोऽप्यव्ययस्याकच सन्निपातेन तदलं विधीयते तस्माद्धिगिति विभक्त्यंतमेव परं तु प्रकृ
तिवदनुकरणमित्यतिदेशेनाव्ययत्वात्सुपो लुक् यदि तु धिगित्यविभक्तिको निर्देश इति एतावानेव प्राचां ग्रंथस्त
दा सम्यगेवाव्ययत्वात्सुपो लुका विभक्तिको निर्देश इति वक्तुं शक्यत्वात्। उभयतः कृष्णं इति। कृष्णस्य पार्श्वद्वये
पीत्यर्थः आद्यादित्वात्तसिः षष्ठ्यर्थे द्वितीया एवमुपपदविभक्तौ सर्वत्र बोध्यं। अत्र व्याप्रवर्त्तते उभसर्वतसोरित्यत्र उ
भसर्वयोर्गणे परस्परसाहचर्यात्तसिलेव गृह्यते न त्वाद्यादिभ्यस्तसिस्तत्पाचो भयत इत्यादौ तसेरश्रवणेन
तसिलादेशाप्रवगंतव्यस्तेन यत्र संज्ञायां तसेस्तसिलादेशाभावस्तत्र न द्वितीया किंतु षष्ठ्येव तसिलभावस्तु
तसेरत्रेत्यत्र किंसर्वनामबहुभ्य इत्यनुवर्त्तनादिति धिक्कृष्णमभक्तमिति तस्यानिंद्यते इत्यर्थः षष्ठ्यर्थे द्वितीया
मनिंद्य इत्यर्थः प्रथमार्थे द्वितीयाऽस्त्येके कथं धिङ्मूर्खेति संबोधनपदस्य क्रियान्वय इति प्राचो बोक्ततया
धिक्शब्दयोगाभावाद्द्वितीया न प्रवर्त्तते इति संबोधनेवेति प्रथममेव भवति क्रियापदं च क्वचिच्छ्रुतं क्वचिदाहि
तं तथा च धिङ्मूर्खेति निषिद्धाचरणमित्यत्र दृष्टि कल्पमूर्खसंबोधकनिषिद्धाचरणस्यानिंते तु वाक्यार्थः प्रथ ६
मार्थे धिग्योगे द्वितीयेति वादिनां तु मूर्खं संबोधकं निषिद्धाचरणं निंद्यमिति वाक्यार्थः तत्र पदविभक्तेः कारक
विभक्तिर्बलीयसीति संबोधने प्रथमैव भवति संबोधपदस्य कर्तृकारकवाचित्वादित्याहुस्तच्चिंत्यं संबोधनस्य
कर्तृकारकत्वे उक्ते संभवाभावात् न च देवप्रसीदेत्यादौ वस्तुगत्या देवपदस्य कर्तृत्वमस्त्येवाक्तकर्त्रे भवइति वाच्यं

वास्तवकर्तृत्वे ऽपि कारकविभक्तित्वस्यालाभात् किंच देवत्वां भजे त्वां भजन्ति भक्ता इत्यादौ संबोधनस्य देवस्य वास्तवमपि क
र्तृत्वं नास्ति इत्यासां तावत् उपर्युपरीति कथं तर्हि उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति । अत्राहुः । उपरि बुद्धीनामुच्चानबु
द्धीनामुपरि चरन्ति इत्यर्थस्ते नात्राम्रेडितत्वाभावान्न द्वितीया षष्ठी प्रतिपदोक्तस्योपर्यधोधसः सामीप्य इति कृतद्वित्व
स्य वार्तिके ग्रहणादिह च वीप्सा द्विर्वचनत्वान्नास्ति द्वितीयाप्रसक्तिरिति । अभितःपरित इति । एतच्चान्यत्रापि दृश्यते
इति पूर्वोक्तस्यैव प्रपंचभूतमिति व्याचख्युः । अभितः कृष्णमिति । पर्यभिभ्यां चेति तसिल् समया निकषा शब्दौ सा
मीप्यवाचिनावव्ययौ विलंघ्य लंकां निकषा हनिष्यति इति माघः । हे सखे देतदे तदाह । तस्यैवाप्यतेति । बुभुक्षितमिति ।
बुभुक्षितस्येत्यर्थः । एवं प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गः न तु कर्मप्रवचनीयस्तेनात्र कर्मप्रवचनीययुक्ते इत्य
नेन गतार्थता न शंक्या । अंतरांतरेण प्रतिपदोक्तत्वान्निपातयोरेव ग्रहणं न तु टाबंतस्य तृतीयान्तयोः । पुंसः रसाहचर्यात् र
ब्रूत यथा गुरुभार्गवा विलुक्ते गदयोरेव प्रतीतिरिति नेत्वाचार्यपरशुरामयोस्तेन किमनयोरन्तरेण गतेनेति सिद्धं किम
नयोर्विशेषणे ज्ञातेनेत्यर्थः अंतरा त्वां मां मिति । तव मम च मध्ये इत्यर्थः हरिशब्दानु द्वितीया न भवति अंतरंगतया प्रथमायाए
वोत्पत्तेः । अंतरेण हरिमिति हरिं विनेत्यर्थः मध्ये इत्यर्थे ऽपि अंतरेण प्राक्तो वर्त्तते मणाल सत्रामलमंतरेण स्थितमस्लह्यामरयोर्द्व
चलन यस इति ह्यामरयोर्द्वयस्य मध्ये इत्यर्थः पुरुषं ग्रहणान्तेह अंतरा त्वां मां कृष्णस्य मूर्तिः इह कृष्णस्यान्न द्वितीया अंतराशब्दप्रयोगे ऽप्यत्
रेत्यनेनान्वयात् कर्मप्रवचनीयाः इत्यधिकृत्येति रीश्वरात्मागिति बोध्यं गुरुसंज्ञाकरणमन्वर्थत्वाय कर्मक्रियां प्रोक्तवं
तः कर्मप्रवचनीयाः बाहुलकात् कर्तरि अनीयर् तेन संप्रतिक्रियां न द्योतयतीति लभ्यते तथा च हरिः क्रियाया द्योतको ना
यं संबंधस्य न वाचकः । नापि क्रियापदाक्षेपी संबंधस्य तु भेदकः इति तथा हि जपमनु प्रावर्षदित्यत्रानु ना न क्रियाविशेषो
द्योत्यते ऽनुभूयते सुखमित्यादौ यथा । नापि षष्ठ्येव संबंध उच्यते द्वितीययैव तस्योक्तत्वात् नापि प्रदेशं विपरिलिखति
विमाय परिलिखतीत्यत्र विशब्देन मानक्रियैव क्रियांतरमाक्षिप्यते कारकविभक्तिप्रसंगात् किंतु जपसंबंधि।

वर्षणमिति द्वितीयायावगतः संबंधो लक्षणलक्षणभाव एवेत्यवगमात् संबंधस्यैवानुनाविशेषो वक्ष्यमाणत्वात् क्वचित् क्रियागत
विशेषोद्योतकेपीयं संज्ञा वचनात्प्रवर्तते सुः पूजायामतिरतिक्रमणे चेति यथा उक्तं संज्ञ इति कर्मप्रवचनीयसंज्ञेत्यर्थः संज्ञ
गत्युपसर्गसंज्ञापवाद इति। ननु जपमनु प्रावर्षदित्यत्र वृष्टिं प्रत्यनोर्योगाभावेन क्रियायोगाभावादेतयोः संज्ञयोः प्रा
प्त्यभावात्कथं तदपवादत्वमस्याः संज्ञाया इति चेत् अत्राहुः गम्यमाननिशमनक्रियामपेक्ष्य तयोः संज्ञयोः प्राप्तिरस्ती
ति संभावनामात्रेण मूलस्य निबंधत्वात् नचैवं कर्मत्वादेव द्वितीयासिद्धेः किमनया संज्ञयेति वाच्यं जपस्य निशमन
प्रयुक्तहेतुत्वाख्यसंबंधविवक्षायां कर्मत्वाभावेन तृतीयायां प्राप्तायां तदारंभात् तथैव मयि जपमनु निशम्य देवः प्रा
वर्षदित्यर्थावगमात् ल्यब्लोपे पंचम्यपवादार्थेयं संज्ञास्त्विति वाच्यं ल्यब्लोपे हि कर्मणि अधिकरणे च पंचमी जपस्य तु
कर्मत्वादिना विवक्षाभावादिति परापि हेतौ तृतीयेत्यादि अयं भावः लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशः योन
हेतुः वृक्षमनु विद्योतते विद्युदिति हेतौ तृतीयाया अवकाशो धनेन कुलमित्यादि जपमनु प्रावर्षदित्यत्र तु हेतुभू
ते लक्षणे परत्वात् तृतीया स्यात् तां बाधित्वा अनुर्लक्षणे इति पुनः संज्ञाविधानसामर्थ्याद् द्वितीयैव भवतीति न च तृतीया
र्थ इति सूत्रेणैव गतार्थताशंक्या तस्य पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधाने इत्येतावन्मात्रबाधकत्वात् सामर्थ्या
दिति। अतएव हेतुत्वपर्यंतमविशदबोधे विषय इति सोऽकल्पत इति भावः नदीमन्विति। द्वितीयायास्संबोधोर्थः ९
वस्त्यपवादत्वादेतद्द्वितीयायाः सचेदृसंबंधः साहित्यरूप एवेत्यनुना द्योतते हीने उत्कृष्टादेव द्वितीया न त्वपकृष्टा
प तेशक्तिस्वभावादित्याशयेनोहरति अनुहरिमिति उपोऽधिके च चकारेण हीने इत्यनुकृष्यते तदाह अधिकैनेचेति। ही
अधिके संज्ञाविधानं न द्वितीयार्थमित्याह सप्तमी विधास्यत इति। यस्मादधिकमित्यनेनेति भावः तस्मिन्नपि सूत्रे कर्मप्र
वचनीया इत्यनुवृत्तेरधिके संज्ञाविधानमावश्यकमेवेति तेषु उपहरिति मिति पूर्ववदुत्कर्षादेव द्वितीया लक्षणेत्थं

हरं प्रतीति। हरसंबंधि द्योतनमर्थः संबंधश्च लक्षणलक्ष्यभावरूप इति तं प्रत्यादयो द्योतयंति भक्तो विष्णुं प्रतीति विष्णोर्भ-
क्तेश्च विषयविषयिभावः प्रत्यादिद्योत्यः भक्तः किंचित्प्रकारं प्राप्त इत्यर्थः लक्ष्मीर्हरिं प्रतीति लक्ष्मीरूपस्य भागस्य
सहप हरिणा स्वस्वामिभावः हरं हरमिति इह वीप्सा द्विवचनेनैव द्योत्यते प्रत्यादिशब्दैः सिक्तिक्रियया संबध्यते कर्मप्रव
द्वितीया कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् षत्वं न एतदर्थमेव लक्षणादयो विषया उपात्ता इति व्याख्या
तमाकरे पंचम्यपाङ्परिभिरिति तत्र न भवति वर्जनार्थेनापेत्यनेन न साहचर्यात् परिषिंचतीति सर्वतः सिंचती
त्यर्थः उपसर्गात्सुनोतीति षत्वं अभिष्यादिति मम भागः स्यादित्यर्थः क्रोंचस्तु मामभिष्यादिति प्रत्युदाहरं
ति तत्र मां प्राप्नुयादित्यर्थः उपसर्गविशेषणात् सः सकर्मकत्वात् मामिति द्वितीया अत्र च मम भागतः इत्यर्थः पर्यवसाद्भागे
इति कर्मप्रवचनीयत्वे निषिद्धे उपसर्गप्रादुर्भ्यामिति मत्वे कुतोऽध्यागच्छतीति इह प्रजयति पराभवति हरं प्रति विर
द्योतत इत्यत्र प्रादेर्विशेषद्योतकत्ववदधिपर्योरिह विशेषद्योतकत्वाभावादनर्थकौ धात्वर्थमात्रद्योतकत्वेन त्वे
र्थवत्त्वास्येवेति बोध्यं गतिर्गताविति त्वत्र पदादित्वाधिक्रियते इति पदात्परत्वसंपत्तये कृत इति प्रयुक्तं अतिरतिक्रम
णे च चकारेण पूजायामिति कृष्यते इत्याह पूजायां चेति अतिक्रमणमनुचितादधिकस्यानुष्ठानं अर्थे हू ये पि एकमे
वोदाहरणमिति अतिदेवानिति अत्र त्वेतदुदाहरति अतिसिक्तमति स्तुतिमिति बहुतरं समीचीनं वा हि स्तुतं स्तुतं चेत्यर्थः बहु
तरार्थे अतिक्रमणं समाचीने पूजेत्येति विवेकः अपिपदार्थ सर्पिषोपि स्यादिति सर्पिर्बिंदुः स्यादित्यर्थः अपेः कर्मप्रवच
नीयत्वे फलमाह अनुपसर्गत्वान्न षइति उपसर्गसंज्ञाभावादुपसर्गप्रादुर्भ्यामस्तिरिति इह न प्रवर्त्तते इति भावः संभा
वनामिति संभाव्यंते इति संभावनाः एताः अपि यो युच भवनक्रियासंभवनायां भवस्याविषयत्वादाहात्स्यादेवेति संभा
वनाया एवेत्यर्थः कर्त्तरि दोले स्यादिति कर्त्तरि दीर्घलभ्याद्भवनक्रियायाः दोलि द्योतयन्नपि शब्दो भवनक्रियावाचिना स्यादित्यने

नसंबध्यते इत्यर्थः अवयवावयविभाव इति सर्पिरवयवि विंदुरवयवः इयमेवेति। विंदुद्योतित्वप्रयुक्तद्योतित्वमपद्यो
तकत्वेवेत्यर्थः द्वितीयेति कर्मप्रवचनीययुक्ते इत्यनेन विहिता नत्वपिनेति न च विंदुनायोगे तद्योतकापिशब्देना
पियोगो जात एवार्थद्वारा शब्दानां योगस्याभ्युपगमादिति शंक्यं अपिशब्दस्य विंदुद्योतकत्वाभावात् कथं तर्
हि विंदुवतीतिरितिचेत् शृणु अपिनाद्योत्यं भवनं द्योत्यमेव कर्तृद्योत्यमादिपतिकर्तृत्वविरह विंदुप्रती
तिरेवेति सप्रतीते अत एवापिशब्दवत्त्वेन गम्यमानस्येत्युक्तं न त्वापिनागम्यमानस्येति उक्तत्वादिति उक्तप्रायत्वादि
त्यर्थः। अपिशब्दः स्यादित्यनेन संबध्यते इत्युक्ते स्यादित्यस्यादित्यस्यापिनायोगो न तु सर्पिष इत्यस्येत्यर्थः पर्यवसानात् अ
पिस्तुयादिति अवाङ्मनसगोचरं विस्मुमपिस्तुयादित्यधिकोक्तिः एतादृगस्यात दीयस्तवनेसामर्थ्यमस्तीत्यत्र किं वक्त
व्यमितिभावः। इत्थंभावनद्योतकोपिशब्दः पूर्ववत्सं भवनाविषये द्योत्यद्योतकेदृतिमहान्भेदः। उपसर्गात्सुनोति
तर४ इत्यादिना षत्वं न भवति कर्मप्रवचनीयसंज्ञायाबाधात् एवमुत्रापि बोध्यं। अपिसिंच अपिस्तुहीति सिंचचस्तुहि चेत्यर्थः। का
लाध्वनोः। अत्यंतविरामम तिक्रांतोरत्यंतः सचासौ संयोगश्चात्यंतसंयोगः निरंतरसन्निकर्ष इत्यर्थः केनेत्याकांक्षायां गुणक्रिया वे
द्रव्यैरित्यौचित्याद्बोध्यं। द्वितीयास्यादिति। अनुतत्त्वात्कालाध्ववृत्तिभ्यामेव स्वरूपात्तदुएत्विहनभवतिकालाः अत्यंतसंयोगेति
समासविधायकेकाला इति बहुवचननिर्देशेन द्वितीयाविधौ स्वरूपविधिर्नेतिज्ञापनात्। अत एव मासप्रमितः मुहूर्त्तो सु
खमिति द्वितीयासमासविधावुदाहरिष्यति। मासं कल्याणीत्यादि। अकर्मकधातुभिर्योगे देशकालादीनां कर्मसंज्ञा विधा ८
नात्। नेह कर्मणि द्वितीयेति द्वितीया प्राप्नोतीति भावः। मासस्य द्विरिति। कृत्वोर्थप्रयोगे काले अधिकरणे इत्यनेन षष्ठीति प्राचः
तन्न तत्र शेष ग्रहणानुवृत्या रक्रोशो जननमितिकृदंतेन सह समासनिवृत्तेरेव फलत्वात्। तस्मादिह षष्ठी शेष इति सूत्रेणैव षष्ठी भ
नत्यंतरंगत्वादित्याहुः। अन्यार्थमारब्धस्यापि कृत्वोर्थप्रयोग इति सूत्रस्य द्विरह्नो भुंक्ते इत्यत्रावि शेषविहितत्वात्तेषु कृतो बाधकं ना
स्तीति केचित्। इति द्वितीया॥ स्वतंत्रः कर्ता। प्रधानीभूतधात्वर्थाश्रयत्वं स्वातंत्र्यं आहुः धातुनोक्तक्रियेतीत्यकार

के कर्तृत्वे तेष्यते इति स्थाल्यादीनां वस्तुतः स्वातंत्र्याभावेपि स्थाली पचति काष्ठानि पचंतीत्यादिप्रयोगो साधुरेवेति ध्वनयति विवक्षितोर्थ
इति। साधकतमं करणं। प्रकृष्टेति। यद्व्यापारानंतरं फलनिष्पत्तिस्तत्प्रकृष्टं। उक्तं च। क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनंतरं विव-
क्ष्यते यदा यत्र करणं तत्तदा स्मृतं विवक्ष्यत इत्यनेन स्थाल्यादीनामपि करणत्वमस्तीति सूचितं। अत एव। वस्तुतस्तदनिर्देश्यं न हि व-
स्तु व्यवस्थितं स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति। अयं भावः। कारकत्वं तत्त्वाप्यकर्तृत्वादिषट्कं च वस्तुविशेषणं वि-
शेष्यभाववच्च न नियतं किंतु वैवक्षिकं न हि गौः सर्वत्र गौरिव न तु कंचित्स्वल्पगोरिति विशेषणं सर्वत्र विशेषणमेवेति वक्तुं श-
क्यं तथा च कथं धातुव्यक्त्या उ स्थाल्यपि तेषां किं कर्त्रादिकमिति चेन्न प्रकृतधातूपात्तव्यापाराश्रयतया विवक्षितः। कर्ता व्यापार-
व्यधिकरणफलाश्रयः कर्म कर्तृकर्मद्वारकसंबंधेन व्यापारस्य फलस्य वाश्रयोधिकरणमिति स्थितं पचधातोर्व्यापाराश्राने कथा एवं च प- ल
चेरधिश्रयणतण्डुलावपनैधोपकर्षणादितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्ता ज्वलनतात्पर्यकत्वे एधाः कर्तारः तण्डुलधारणादिपरत्वे
स्थाली कर्त्री अवयवविभागादिपरत्वे तण्डुलाः कर्तारः स्थाल्या पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयो विस्थाली करणमेव न तु कर्त्रीवे- पा
वदत्तादिव्यापारस्यैव तदुपात्तत्वात्। तथा त्वादि खादिभ्यामनुपात्तेर्थे प्रयोज्यः कर्ता तस्मिन्नेवार्थे भवतीति नोपात्ते प्रयोज्यः कर्म अधिष्ठवैः
शीङादिभिरुपात्तेर्थे आधारः कर्म केवले रूपात्ते अधिकरणमित्यादि ज्ञेयं। एतेन ज्ञानस्य स्वप्रकाशकत्वे कर्तृकर्मविरोध इति केषांचिदु- को
क्तिः परस्मात् तदुपात्तक्रियायां यदा यस्य स्वातंत्र्यं विवक्षितं तदा तत्क्रियायां स कर्ता यदुपात्तया कर्तुः क्रियया यदाप्तुमिष्टतमत्वेन
यद्विवक्ष्यते तदा तत्कारकं तत्तत्क्रियायां कर्मेत्येवं शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षे उक्तसंभवात्। यत्तु केचित् परसमवेतक्रियाजन्य-
घृता न्यफलशालित्वं कर्मत्वं चैत्यः पततीत्यादौ स्वसमवेतक्रियाजन्यविभागादिफलशालिनि कर्तर्यतिव्याप्त्यभावेपि अपादानेतिव्याप्तिः स्या-
देवं तत्स्वधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्येवाभ्युपगंतव्यम्। एवं च सति ग्रामं गच्छतीत्यादि सकर्मकेषु गमनजन्यसंयोगा-
दौ विप्रानुरोधेन धात्वर्थतावच्छेदकत्वेभ्युपगतेपि तात्पर्ये पततीत्याद्यकर्मकेषु पतनादिजन्यविभागादेस्तदवच्छेदकत्वाकल्पनयापादाने तिर-
व्याप्तिर्नवा ग्रामं गच्छतीत्यादौ कर्तर्यतिव्याप्तिः संयोगादिफलजनकीभूतधात्वर्थस्य परसमवेतत्वविशेषणात् कर्मत्वेनाभिमतं यत्तद्भिन्न-
त्वपरशब्देनात्र विवक्षितत्वात् इत्याहुः। तदप्येतेन प्रत्युक्तं ग्रामं गमयति देवदत्तमित्यादौ गंतर्यतिव्याप्तेः णिजर्थप्रेरणाजन्यप्रयोज्यव्यापारे गम-
नादौ धात्वर्थतावच्छेदकत्वाभावात्। तत्त्वाभ्युपगमेनेतुदेन पाचयतीत्यादौ प्रयोज्यकर्तर्यतिव्याप्तेः गतिबुद्धीत्यादिशास्त्राभ्युपगमं विना क्वचित्प्रयो-

न्ये कर्तरि कर्मत्वं क्वचित्कर्तृत्वमिति निर्धारयितुमशक्यत्वात्। हृक्रोरन्यतरस्यामिति शास्त्रमन्तरेण हारयति कारयति वा कटं भृत्येन
मिति। भृत्यैर्वाऽत्रैव कल्पिककर्मत्वस्य दुरुपपादत्वाच्च। एतादृशेषु वैयाकरणोक्तैव रीतिर्ग्राह्या इति चेत्तर्हि आकडारादेका संज्ञा पराऽनवकाशा
चेत्युक्तत्वान्निरवकाशाया अपादानसंज्ञया सावकाशायाः कर्मसंज्ञाया बाधान्नोक्तातिव्याप्तिरिति किमनेन धात्वर्थतावच्छेदकेत्यादिपरि
श्रमेण। स्यादेतत्। आत्मानमात्मना वेत्ति सृजत्यात्मानमात्मनेत्यादिप्रयोगः कथं संगच्छते एकस्यैव वस्तुनो युगपदेकक्रियानिरूपित
दि कर्तृत्वकर्मत्वादेरसंभवात्। परस्याकर्तृसंज्ञया कर्मकरणसंज्ञयोर्बाधात्। नैष दोषः अहंकाराद्युपाधिभेदेनात्मनो भेदमाश्रित्यात्मानमात्मा
त॰ हन्तीत्यादिप्रयोगस्याकरे समर्थितत्वात्। ननु साधकं करणमित्येवास्तु कारकाधिकारादिह कारकमिति वर्तते साधकं कारकं हि पर्याय।
स्तु पायो भयेऽपादाने न प्रकर्षो लभ्यते इत्याशयेन प्रवृत्तेति। तमपग्रहणमिति। इतरस्तु कारकप्रकरणे गौणमुख्यन्यायप्रवृत्त्यर्थं तादर्थ्ये
न प्रवर्तते इति ज्ञापनाय तमब्ग्रहणमित्याशयेनाह। ज्ञापनफलमुदाहरति। गंगायां घोषः इति। उक्तज्ञापनान्नमीकारे त्विहाधिकर
णसंज्ञा न स्यात् तिलेषु तैलं दधनि सर्पिरित्यादौ मुख्याधारेतरस्याश्रितार्थत्वादिति भावः। अत्र व्याचक्षुः। यदा चेतीरधर्म आधार
त्वं सामीप्यात्प्रवाह उपचर्यते तदेदं प्रयोजनं यदा तु गंगापदं शक्त्या तीरे वर्तते तदा तु न प्रयोजनं तीरस्य मुख्याधारत्वात्तत्राघ
प पदे विभक्तिर्लीनलक्षकी हि ये लक्षितिर्लीनलक्षकीत्यादिरामेणेति। यद्वा विभक्त्युपस्थितानां कारकाणां क्रियां प्रति विशेषणत्वेनैव तथापि
कृदुपस्थितानां विशेष्यत्वेन सत्त्वप्रधानानि नामानीत्युक्तेः धात्वेकपदस्थाप्ययोः फलव्यापारयोर्हन्यत इत्यादिकर्माख्यातसमभिव्याहा
रे विशेषणविशेष्यभावव्यत्यासाभावेऽपि हतः इत्यादि कर्मकृत्समभिव्याहारे व्यत्यासोऽस्त्येव तथा च रामनिष्ठो यो व्यापारो धनुराकर्षणादि
स्तद्विषयीभूतो यो बाणव्यापारः शरीरभेदनादिस्तत्साध्यप्राणवियोगाश्रयो वालीति वाक्यार्थः। वालिनं हन्ति वाली हन्यते इत्यादौ तु वालिनि
ष्ठः प्राणवियोगानुकूलो यः शरीरभेदनादि बाणव्यापारस्तद्विषयको रामनिष्ठधनुराकर्षणादिव्यापार इत्यर्थो बोध्यः। अत्रेदमवधे
यं। फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणमिति धातुस्यत इत्यन्वयः वाचकत्वेनेति शेषः। आ
वि श्रये तु तिङ इति विभक्तिपरिणामेन तङ्स्मृता इति संबध्यते वाचकत्वेनेति पूर्ववत् तिङ इत्युपलक्षणं द्वितीयातृतीयादीनामपि केचिदाश्र
यमात्रार्थकत्वात् न चैवमाधारार्थकत्वे द्वितीयातृतीयासप्तमीनां सांकर्यं स्यादिति वाच्यं निरूपकभेदेनाधारभेदात् फलनिरूपिताधारो द्वि
तीयार्थः व्यापारनिरूपिताधारस्तृतीयार्थः स्वाश्रयद्वारा व्यापारनिरूपितः फलनिरूपितश्च सप्तम्यर्थ इति चाभ्युपगम्यते फले प्रधा

नामिति एतच्च प्राप्तिकं कर्मकृत्समभिव्याहारे तद्व्याप्यत्वात्मोऽस्त्येवेत्युक्तत्वात् । हरिं भजति देवदत्त इत्यादौ तु व्यापारस्य प्राधान्यमस्त्येव प्रकृति
प्रत्ययार्थयोर्हरिर्धारयोर्देवदत्तनिष्ठव्यापारयोश्चाभेदः इह संसर्गः तथा हरिर्धारिकाया प्रीतिस्तदनुकूलैकदेवदत्ताधारको वर्त्तमानो
व्यापार इति वाक्यार्थः न चाधारतैयं वोच्या इति मंतव्यं तत्र तत्र धर्मस्याधारत्वस्य वाच्यतावच्छेदकता प्रत्यासत्ति गौरवात् । कर्मणि द्वितीये त्यादि सू
त्रस्वरसभंगापत्तेश्च अत एव भाष्यकारोप्याह स्वपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङामिति अनभिहिते किं हरिः करोति पाचकः के
नेरित्युक्तं । शाब्दिकः शब्दं ददुरं करोतीति वकृकृते विश्वं येन सहकृत विश्वः विश्वकर्मकं कृतं यस्य इत्यर्थः निर्वत्य नेन विनीवनः करणे ल्युट्
प्रकृत्यादिभ्य इति आकृतिगणोयं तेनाम्नास्तृतीया तस्मिन्निरतेनदंतो त इति सिद्धं । चारुरिति । अभिरूप इत्यर्थः क्रियायां अप्रवर्णत्वकर्तरि करण
योरभावात् षष्ठीह प्राप्ता एतच्च गम्यमानकरोतिक्रियाकरणत्वात्सिद्धं करणं तर स्युद्धसाधकतमं कृते रेवकरणत्वविवक्षितत्वभावो नाप
मति रूपः कृतो नत्वं लकारादिना इत्यर्थात् प्राचेणयाज्ञिक इति एतदपि गम्यमानज्ञानक्रियां प्रति करणत्वात्सिद्धं मातारादिवाद्वस्त्येन यु
ज्ञिको यज्ञितिजनेज्ञीयत इत्यर्थात् । गार्ग्यो स्यगोत्रमित्यर्थः प्रपमाचष्ट्राप्ता गोत्रेणाह ज्ञायेइत्यर्थादित्वापितृतीया सिद्धं । समेनेत्यादि । समेते
नीत्याघर्षे समविषमाभ्यां कर्मणि द्वितीया प्राप्ता इत्यपितृतीया सिद्धं यथा वगमने करणत्वात् अनुपगमात् । द्विद्रोणेनेति । द्रोणेनक्रयो समाहारो
द्विद्रोणं पात्रादित्वात् स्त्रीत्वाभावः द्रोणद्वयसंबंधिधान्यमित्यर्थः इह षष्ठी प्राप्ता द्विद्रोणपरिमितधान्यावच्छेदे द्विद्रोणशब्दस्य य
स्य च रूपप्रतिकरणत्वमिती तृतीयापि तृतीया सिद्धेति दिक् । चादिति । करणशब्दानुवृत्त्या परिक्रयो संप्रदानमन्यतरस्यामित्युत्तर
सूत्रे अस्यान्यतरग्रहणापकर्षेण नवा संज्ञयोः पर्यायत्वे लब्धे चग्रहणं समुच्चयार्थं तेन मनसा दीव्यति मनसा देव इत्यत्र कर्मण्ये
ण करणे तृतीया बोभययुगपत्ति ध्वनति मनसः संज्ञायां मित्युक्तं लुक् । किंच । अक्षैर्दैवयते देवदत्तो यज्ञदत्तमित्यत्र सकर्मकत्वाद द्विती
ब कर्तुर्णौ गतिबुद्धीत्यनेन कर्मत्वेन अक्षाणां कर्मकादिति परस्मैपदमपि न भवति । न तु कर्मकरणसंज्ञा समावेशे मनसा देव इत्यत्र श
कृता यौद ज्ञानदीव्यतीत्यत्र परत्वाच्चतीयैव स्यान्नतु द्वितीये ति । चेदत्राहः । कार्यकालपक्षे कर्मणि द्वितीयेत्यत्र पदस्यापस्थानं तस्यानवका
शात्वाद्द्वितीयेति स्यादेतत् । दीव्यते ना इत्यत्राभिहिते पि कर्मणि करत्वस्यानभिधानात् तृतीया स्यात् । तथा देवनाभूतं इत्यत्र ल्युटा करण
ब त्वस्याभिधानेपि कर्मत्वानभिधानाद्द्वितीया स्यात् । मैवं । एकैवात्र शक्तिः संज्ञाद्वयं योगिनी तथा चैकस्याः शक्तोर्वाभिहितायामन्यस्या
अप्यभिधानात् उभयत्राप्यभिधानमेव न त्वनभिहितत्वं । सह युक्ते प्रधाने इत्येव वाच्ये युक्तग्रहणादर्थग्रहणमित्याह । सहार्थेन
ति । सहार्थकशब्देन सह सार्कं सार्द्धमित्यादिनेत्यर्थः । पुत्रेणेति । पितुरत्रागमनक्रिया संबंधः शाब्दः पुत्रस्यात्वार्थ इत्येतावतैव तस्या

प्राधान्यमुच्यते। अप्रधानग्रहणं त्वकर्तुं शक्यं। न चैवं पितुरपि तृतीयापत्तिः। तत्र प्रातिपदिकार्थमात्रे अन्तरङ्गत्वात्प्रथमोपपत्तेः। न च यत्र प्रयुज्यमा
न प्राप्नोति पुत्रेण सह पितुरागमनमित्यादौ तत्र प्रधानात्पितुरपि तृतीया स्यात् अतस्तद्वारणायाप्रधानग्रहणमावश्यकमिति वाच्यं।
कारकविभक्तेर्बलीयस्त्वात्कर्तृकर्मणोः कृतीति षष्ठ्या एव तत्र प्रवृत्तेरिति दिक्। येनांगविकार इति। येनेति सर्वनाम्ना प्रकृत्यर्थभूतोऽवयवो गृ
ह्यते सन्निधानात्। स चार्थाद्धि कृतानवनस्य विकृतेनावयवेन शरीरस्याविकारः संभवतीति तदेतदाह। येनांगेन विकृतेनेति। खंजेनेति। सूत्रे
गशब्दोऽत्र शरीरपरं तदिति भावः। जटाभिरित्थंभूतलक्षणत्वमुपपादयति। जटाज्ञाप्येति। जटाभिर्ज्ञाप्यं यत्तापसत्वं तद्विशिष्ट इत्य
र्थः। संज्ञो ज्ञा अवबोधन इत्ययमेव गृह्यते न तु जनी प्रादुर्भाव इति तस्याकर्मकत्वात्। उ. स.: प्रागभागस्य इत्यस्याप्यलुपो न इत्यलुपोपेन।
निष्पन्नत्वात् पालात् न णिकत्वादित्याशयेनाह। जानातेरिति संज्ञानीत इति। संप्रतिभ्यामनाध्याने इति तङ्। कृद्योगे परत्वात्कर्तृकर्मणो
रिति षष्ठ्येव पितुः संज्ञाता। प्राधान्ये तु पित्रा पितरं वा संजानाति हरदत्तस्त्वाह। प्राधान्ये तु परत्वात् षष्ठी गर्थेति षष्ठी मातुः संजानातीति तन्न
तत्र शेषाधिकारादिति मनोरमायां स्थितं। हेतौ। हेतुरिह लौकिकः फलसाधनीभूतो गृह्यते न तु तत्प्रयोजको हेतुश्चेति कृत्रिमः तस्य च
कारेण कर्तृसंज्ञाविधानात्। कर्तृत्वादेव तृतीयासिद्धेरत आह। तेनार्थ इत्यादि। ननु लौकिकहेतोरपि करणत्वादेव तृतीयासिद्धौ कि
मनेनेत्याशंक्य हेतुत्वकरणत्वयोर्भेदमाह। द्रव्यादीति। आदिशब्देन गुणक्रिये गृह्येते द्रव्यगुणक्रियानिरूपितं निर्व्यापारस्य व्यापा
च रहितवृत्ति यत्तद्धेतुत्वमित्यर्थः। करणत्वं त्विति। क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च यत्तत्करणत्वमित्यर्थः। एवं च हेतुकरणयोर्भेदादन्यत
रेणान्यस्यान्यथासिद्धिर्न शंक्येति भावः। उक्तं च। द्रव्यादिविषयो हेतुः कारकं नियतक्रियमनाश्रितेन व्यापारे निमित्तं हेतुरिष्यत इति द्रव्य
विषये हेतुत्वमुदाहरति। दंडेन घट इति। दंडहेतुको घट इत्यर्थः। अत्र हि व्यापारोऽस्तु वा मा वा साध्यक्रियानन्वयित्वाभावात्करणं नास्तीति भावः। क्रि
याविषये उदाहरणमाह। पुण्येन दृष्ट इति। पुण्यशब्देनेह परमात्मैव उच्यते तस्य च दर्शनरूपक्रियान्वयित्वसंभवेपि व्यापारवत्त्वाभावा
पात.४ त्करणत्वाभावमिति भावः। यदा तु यागादिकं कर्मैव पुण्यशब्देन विवक्षितं तस्य व्यापारवत्त्वमस्त्येवेति। कर्तृकरणयोरित्यनेनैव तृतीया। १०
सिद्धा गुणविषये तु एत्वेन मोरवशी इत्युदाहार्यं जटाभिस्तापस इत्यादौ तु लक्षणलक्षणभावविवक्षायां हेतुत्वाविवक्षणादत्र नाप्रा
प्तात्तृतीयेति इत्थंभूतलक्षणे इत्यारब्धमित्याहुः। अत्र केचिदुत्येदंते। द्रव्यादिसाधारणत्वाद्धेतुत्वस्य हेतावित्यनेनैव बाणेन हत
तं इत्यादिप्रयोगसिद्धेः कर्तृकरणयोरित्यत्र करणग्रहणं त्यक्तुं शक्यं करणसंज्ञा त्वावश्यकी करणाधिकरणयोश्चेत्याद्यर्थमिति। अन्ये
त्वेतु क्रियासाधकतमं यत्तद्व्यापारवत्त्वेन विवक्षितं चेत्करणं नो चेद्धेतुः द्रव्यसाधकतमस्य दंडादेर्व्यापारवत्त्वेपि हेतुत्व

मेव एवंच रामेण बलेन हत इत्यादौ हननेवाणादि र्निमित्तमित्येतावदेव पदाद्विवक्ष्यते तदा हेतावित्यनेनैव तृतीया वाणव्यापार साध्यप्राणवि
योगाश्रय इत्येवं व्यापारा विष्टत्वेन विवक्षायांतु हेतुत्वाविवक्षणात्कर्तृ करणयोरिति करणे तृतीयाश्रवेत्याहुः। फलमपीति। एतच्च प्रत्यय
इति सूत्रे कैयटेस्पष्टम्। अध्ययनेनेति। तादर्थ्यविवक्षायांतु चतुर्थ्यपि भवतीति चतुर्थ्यासह पंचतृतीयाविकल्प्यते। अध्ययनायवसतीत्य
इति सूत्रे केचित्परिष्कुर्वंति। अध्ययनेनवसतीत्यत्र दंडेहेतु कोबटइतिवदध्ययनहेतुको निवास इत्यर्थ स्वीकारेप्ययं विशेषः। अध्ययनस्य य
त्रके चित्परिष्कुर्वंति। अध्ययनेनवसतीत्यत्र दंडहेतुकोबटइतिवदध्ययनहेतुको निवास इत्यर्थस्वीकारे। अध्ययनस्य
फलेनहामेदः सगीः। उपकारक त्वेनसहहेतु निरूपकतानतत्फलाभिन्नाध्ययननिरूपितोपकारकत्वाश्रयनिवसनानुकूलो
व्यापार इत्यर्थः। दंडेनघट इत्यत्र तु दंडनिष्ठोपकारकत्वनिरूपितोपकार्यत्वाश्रयीघट इत्यर्थः। उपकार्यं हि साध्यं फलमपि तदेवेति ग
म्यमानापीति। अपि शब्देन श्रूयमाण क्रिया समुच्चीयते नकेवलं श्रूयमाणैव क्रियाविभक्तौ प्रयोजिका किंतु गम्यमानापीति भावः
साधनेति। साधनमित्यत्र वक्ष्यमाण भूतोपयोगात्तदर्थप्रतीतिभावः। अशिष्टेति। एतद्वचनं भाष्ये साक्षात्चतुर्थ्यर्थे इत्यनेनज्ञाप्यत इति
मनोरमायां स्थितं केचिदिदमपरिष्कुर्वंति। अशिष्टव्यवहार इत्यंशोवाचनिक एवान्यांशतु ज्ञापकसिद्ध इति। दास्यासंयच्छते
इति। दाणश्च साचेदिति तङ्। प्राप्नोति धर्मेति यच्छादेशः। कामुक इति। लषपतपदेत्यादिना कर्मणि उकञ्॥ इति तृतीया ॥ महासंज्ञा
करणमन्वर्थसंज्ञाविज्ञानार्थं सम्यक्प्रदीयते यस्मै तत्संप्रदानमिति अत आह। दानस्येति। दानक्रियाकर्मणा कर्तायमभिप्रैति संबध्ना
तिइच्छतीति वा तत्कारकं संप्रदानसंज्ञकमित्यर्थः। तेनाजां नयति ग्रामं हरति दण्डाति वृद्धेइत्यादौनातिप्रसंगः। दानेवायुनुग्रहणायस्व
त्वनिवृत्तिपूर्वकं परस्वत्वापादनं अत एवरजकस्य वस्त्रं ददाति इत्यादौ न भवति तत्र हि ददाति भाक्तः। एतद्वृत्तिमत भाष्यमते तु ना
न्वर्थतायामाग्रहः खंडिकोपाध्यायः शिष्याय चपेटां ददातीति प्रयोगात् रजकस्यददातीति प्रयोगस्तु शेषत्वविवक्षायां भविष्यति नचैवमजां
नयति ग्राममित्यादौ अतिप्रसंगः शंक्यः अजां प्रति ग्रामस्य शेषित्वाभावात् यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वं कर्मणश्च शे
षत्वं लभ्यते गांप्रति तु विप्रस्य शेषित्वमस्तीति भवति तस्य संप्रदानसंज्ञा अत्र अभिप्रैतीत्येतत्पदत्रयं न तु समानाह उद्देश्यत्वगतिम
तीच तिङा गतेः गतिमात्रोव वक्तव्य इति वार्तिकस्थछंदो विषयत्वादितिहृदद्गां भाष्ये विषयत्वेन पत्युः कुरुते इत्यादौ समासत्वात्लोपत्य
त्तिः स्यात लिंगसर्वनामनपुंसकता स्यादुपेत्यसमो नपुंसकादिति लुकि कृते पि हस्वो नपुंसक इति हस्वः स्यात् पत्युः कुबेरस्त्रित्यत्र तु
नलोपः स्यात्तस्मादुक्तवार्तिकस्थछंदो विषयत्वयुक्तमेव दानीय इति बाहुलकात्संप्रदाने अनीयर क्रिययेति। क्रियायाः क्रियम
कर्मत्वाभावात्तेया अभिप्रेयमाणस्य सूत्रेण संज्ञा न प्राप्नोतीति वचनमेतत् क्रियार्थोपपदस्य च कर्मणि स्थानिनः स्तम्भेनेतसिद्धपत्येशेते
इत्यादौ पति मनुकूलयितु शेते इत्यादयर्थे अनुपगमेवाधकाभावात माघ्यकारमते तु कर्मणा यमभिप्रैतीति सूत्रेण एव सिद्ध सदर्शनार्थ

नाध्यवसायैराप्यमानक्रियापि कृत्रिमं कर्मेति तैरुक्तत्वात् नचैवमप्यददातिकर्मत्वात् क्रियया यमभिप्रैति इस्येतद्वचनकर्तव्यमेवेति
वाच्यं भाष्ये अन्वर्थसंज्ञात्वाश्रीकारात् नन्वेवं कटं करोतीत्यादौ तत्र च तादर्थ्यादावपि संप्रदानत्वप्रसंगस्तथा च वचनद्वयं बलात्कर्मसं
प्रदानयोः पयौ पत्ये कराय करोतीत्यादौ च तिष्ठति प्रयोगोपि स्यादिति चेत् अत्राहुः पत्ये शेते इत्यकर्मकस्य ले भावकाश्यायाः संप्र
दानसंज्ञा निरवकाशायाः कर्मसंज्ञया बाधान्नैवातिप्रसक्तिः नचैवं गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ विति सूत्रमावश्यकमेवेति तद्व
त्याख्यानं भाष्ये स्यनसंगच्छते इति वाच्यं भाष्ये तत्प्रत्याख्यानस्य प्रौढिवादमात्रत्वादिति स्यादेतत् दानस्य तदर्थत्वात्तादर्थ्ये
चतुर्थी सिद्धैव किमनया संप्रदानसंज्ञयैवं दानक्रियार्थेपि संप्रदानेन लदान क्रिया तदर्थीकारकाणां क्रियार्थत्वात्
कर्मणः करणसंज्ञेत्यादि द्वंद्वसमेतत् अतएव तु न्यायेन तिद्वत्वादिति प्रत्याख्यायते। रुच्यर्थानां। रुचिरर्थो येषां तेरुच्य
र्थास्तेषां प्रीयमाण इति प्रीञ् तर्पणे कर्मणिलट् हरये रोचत इति हरिः प्रीणयतीत्यर्थः कर्मसंज्ञायां प्राप्तायां वचनं यद्यपि रुचि
र्दीप्ताविति पठ्यते तथापि इह दीप्तिर्न विवक्षितेत्याह। अन्यकर्तृकोभिलाष इति अतएवादित्यारोचते दित्यत्र दीप्य
र्थे संज्ञा न भवति हरिनिष्ठप्रीतेरिति एतेन अन्यकर्तृकत्वमिह प्रीत्याभयान्यकर्तृत्वमित्युक्तं भवति मोदकः पयीति देव
दत्तस्यैव प्रीयमाणत्वे न तु पयस इति न तस्य संप्रदानत्वं प्रीयमाणपदाभावे तु पयसोपि स्यादिति भावः श्लाघह्नुङ्स्थाशपां ज्ञीप्स्य
मानः मातिनिवृत्तौ शपउपालंभे कृष्णाय श्लाघते इति कृष्णं स्तौतीत्यर्थः कर्मत्वे प्राप्ते वचनमिदं अन्ये त्वाहुः। कृष्णाय श्लाघमान
परं वाम्श्लाघकं यथतीत्यर्थ इति अस्मिंस्तु पक्षे शेषषष्ठ्यां प्राप्तायां वचनमुक्तमिति। स्वात्मीभ्यः कृष्णं ह्नुवोनातमेवार्थं कृष्णं बोध
वा यतीत्यर्थ इति यस्य कस्य चित्कृष्णाय ह्नुते बोधयतीति वा तिष्ठत इति। स्थित्या स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः प्रकाशनस्थेयाख्ययोश्च ११
ति तङ् शपत इति उपालंभेन स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः धारेरुत्तमर्णः ऋणं अवस्थाने हेतुमण्णिजंतः उत्तमर्णो धन
स्वामी अत्रैंःक्तः ऋणमृणं माधमर्ण्ये इत्यत्र व्यवहारविशेषोपलक्षणार्थमाधमर्ण्यग्रहणमिति व्याख्यानादुत्तमर्णे णिच् निपात
नत्वं भवति अस्मादेव निपातनादत्र बहुव्रीहौ निष्ठांतस्य परनिपातो बोध्यः। भक्ताय धारयतीति इह भक्तं उत्तमर्णो हरिरधमर्णः
इह कर्मकत्वाद्दौकर्तुर्लोके कर्मत्वे शतं धारयति ग्राम इति परत्वादिक अधिकरणसंज्ञा भविष्यतीति चेदुत्तमर्णो पितृर्द्धि हेतुसंज्ञा स्यादि
ति द्रष्टव्यः ततश्चोत्तमर्णग्रहणं भावि ... अधिकरणसंज्ञाया अपवादः स्यात्तद्वारणाय उत्तमर्णग्रहणं

मितिभावः। एवंच कृते पुत्रस्मरणगर्हणे तत्प्रयोजको हेतुश्चेति हेतुसंज्ञायां प्राप्तायां तद्बाधनार्थमिदं संप्रदानसंज्ञावचनमिति तन्निष्कर्षः। मा
तुः मनोरमायां तु अप्राप्तायामिदं वचनमित्युक्तं। स्पृहेरीप्सितः। स्पृह ईप्सायां चुरादावदंतोऽनेन स्पृहयतीत्यत्र लघूपधगुणेन
परत्वादिति। तेन परस्वरेण स्पृहणीयशोभं स्पृहणीगुणौ महात्मभिरित्यादौ कर्मणि अनीयर् सिध्यति शेषत्वविवक्षायां तु कुमार्य
इव कांतस्यत्रस्यंतीति स्पृहयंति वेत्यत्र षष्ठ्यपि सिध्यतीति। हरदत्तादयः। वाक्यपदीयहेलाराजीयग्रंथयोस्तु स्पृहयतियोगे कर्म
संज्ञायाः शेषषष्ठ्याश्च बाधिकेयं संप्रदानसंज्ञेति स्थितं युक्तं चैतत्। क्रियया यमभिप्रैति इत्यनेनैवेष्टसिद्धेः स्पृहेरीप्सित इत्येतत्सू
त्रस्य हरदत्तादिमते वैयर्थ्यप्रसंगात्। तस्माद्वाक्यपदीयादिग्रंथानुरोधेन परस्वरेण स्पृहणीयशोभमित्यादौ दानीयो विप्र इतिव
द्बाहुलकात् संप्रदाने अनीयरिति व्याख्येयं कुमार्य इव कांतस्येत्यत्र तु त्रस्यंतीत्येतदपेक्षया कृताऽपि स्पृहकांतस्येति षष्ठ्यंतस्य विभक्ति
विपरिणामेन कांताय स्पृहयंतीति व्याख्येयमिति केचित्। क्रुधद्रुह। क्रुध क्रोधे द्रुह जिघांसायां ईर्ष्य ईर्ष्यायां असूयतिः कंड्वादियगंतः प
यामर्षार्थे इवाऽर्थो येषां धातूनामित्यर्थः। द्रोहोऽपकार इति। द्रुह इति पाठाभिप्रायेण जिघांसा द्रोह एवेत्यर्थ इत्यनुभाष्यत्वा
प न्न्वेहमेति परसंमत्सरणमित्यर्थः। क्रुधद्रुहोरकर्मकत्वात्तद्योगे षष्ठी प्राप्ताऽन्येषां सकर्मकत्वाद्द्वितीया प्राप्ता ननु चित्तदोषार्थानामित्ये २४
वास्तु किं क्रोधादीनां विशिष्योपादानेनेति चेत् तत्राह। द्विप्रादवति प्रसंगवारणाय विशिष्योपादानं तेन योऽस्मान्द्वेष्टि यं च वयं द्वि
ष्म इत्यत्र चतुर्थी न भवति तत्र स्वनभिनंदने द्विषेरर्थः अत एव चेतनेषु न प्रयुज्यते औषधं द्वेष्टि देवदत्तमिति कोपप्रभवा एवेति
कं पतर्हि कुप्यति कस्मैचिदिति तिनहि कोपः कोपप्रभवः। अत्र व्याचख्युः कुपिरत्र द्रोहार्थ इति व्यत्येरीते इति वक्रियया यमित्येव सि
द्धेः क्रुधद्रुहोर्ग्रहणं चित्यप्रयोजनमित्याहुः। राधीक्ष्योः। राध संसिद्धौ ईक्ष दर्शने अनयोस्तिवृत्तं शुभाशुभपर्यालोचनमर्थस्त
द्वप्रश्नपूर्वकमित्याशयेन विवृणोति। पृष्टो गर्ग इति। शुभाशुभरूपयोः कर्मणोर्द्धात्वर्थेनोपसंग्रहादकर्मकावेतौ अत एव राध्यतीति
तिश्यन् राधोकर्मकाद्वृद्धावेवेति [illegible] दिवादिषु वक्ष्यमाणेन गणसूत्रेणाकर्मकादेव तद्विधानात्कस्य संबंधि शुभाशुभमित्या
यांशुपगमात्। षष्ठ्यां प्राप्तायां वचनमिदं। अनुप्रतिगृणश्च इति। अंतस्यानुकरणशब्दात्पंचमी प्रत्याहुः भ्यामिति पूर्वसूत्रे द्विवचनमि
र्देशात्प्रत्येकमेव धातुसंबंध इति निर्द्धारितेतत्साहचर्यादिहापि प्रत्येकमेकधातुसंबंध इति सूचयन्नाह। आभ्यां गृणाति रिति

हो ऽत्रे इति कर्मत्वे प्राप्ते वचनं। नाद्वे क्रयणे ऽइति। द्रव्यदानेनात्यंतस्वीकारः क्रयः तस्य सप्तमी पंचशिशब्दस्याद्यत्र्ये ऽत्र नियतकालात् क्रयणस्य
रिक्रयणस्य न्यूनकालात्वादित्याशयेनाह। नियतेति। भृत्यावेतनादिना। तादर्थ्य इति। भृतस्यैकार्थो येदं तदर्थं तस्य भावस्तादर्थ्यं ब्राह्म
णादित्वात्ष्यञ् कृत्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति सिद्धांतात् ष्यञा संबंधो भिधीयते स च संबंधो ऽनेकविधो न तु का
र्यकारणभाव एवेति न ब्राह्मणपदधीत्याद्यपि सिद्धं ब्राह्मणस्य ऽध्ययनं त्वेपि तस्य स्वकार्यत्वात् न चैवं दधिशब्दादपि चतुर्थी स्यादिति
शंक्यं संबंधस्य द्विनिष्ठत्वेपि षष्ठीवद्विशेषणादेव भवतीत्याकरे ऽभ्युपगमात्। एवं यूपाय दारु इत्यत्र दारुशब्दादपि न भवे
ति हेतावितितृतीयापि षष्ठीविषय एव भवतीति सापीह न भवति किंतु प्रातिपदिकार्थे प्रथमैव। न चैतद्वार्त्तिकस्यावश्यकत्वे
चतुर्थी संप्रदाने इति सूत्रं व्यर्थमिति भ्रमितव्यम् हरये रोचते इत्याद्यर्थं तस्यावश्यकत्वात्। विप्राय गां मित्यत्रापि तादर्थ्यं च
तुर्थ्याः प्राप्तिर्नास्तीति प्रागेवोक्तत्वादिति दिक्। क्लृपीति। संपदादित्वाद्भावे क्विप् तदंतात्सप्तमी संपत्तिरिहाभूतप्रादुर्भावः क्लृ
प्यर्थकधातुप्रयोगे यः संपद्यते तत्र चतुर्थी विकारवाचकाच्चतुर्थीत्यर्थः। स हि संपद्यते प्रादुर्भवतीति तदुदाहरति भक्तिर्ज्ञाना
येति। ज्ञानात्मना परिणमते इत्यर्थः प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी अभेदविवक्षायां तु परत्वा
त्प्रथमैव भक्तिर्ज्ञानं कल्पते इति यदा तु जनिकर्त्तुरिति भक्तेरपादानत्वं विवक्ष्यते तदा विज्ञानस्याभिहितकर्तृत्वात्प्रथमै
व भक्तेर्ज्ञानं कल्पते क्लृपीत्यर्थग्रहणमित्याशयेनाह संपद्यत इत्यादिना यद्यपि तादर्थ्ये चतुर्थ्यैव भक्तिर्ज्ञानायेत्यादिप्रयो १२
गाः सिद्ध्यंति तथापि परिणामत्वप्रकारकबोधार्थमिदं वचनमित्याहुः प्राणिनां शुभाशुभसूचको विकार उत्पातः तेन
ज्ञापिते पि वर्त्तमानाच्चतुर्थी वाच्येत्यर्थः वातायेति वातस्य ज्ञापिकेत्यर्थः। हितेति। चतुर्थीसमासविधानात् ज्ञापकादेतल्लु
भ्यमिति भावः एवं सुखयोगेपि चतुर्थी बोध्या। क्रियार्थोपपद क्रियार्थः प्रयोजनं यस्याः सा क्रियार्था सा क्रिया उपपदं यस्य
यद्यपि क्रियायाउपपदत्वं न संभवति तथापीह तद्वाचकशब्दद्वारा तद्बोध्यं क्रियाफलकक्रियावाचकमित्यर्थः क्रियावाच
कस्यापि धातोरुपोच्चारितपदरूपोपपदत्वं यद्यपि न संभवति सुप्तिङंतस्यैव पदत्वात् तथापीह क्रियावाचकप्रकृतिकमित्यर्थो

विवक्षितः तादृशमुपपदं यस्य तुमन्तस्य कर्मणि चतुर्थी भवतीति निष्कृष्टोर्थः। तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति सूत्रमहिम्ना क्रियार्थकमु-
पपदं क्रियावाच्येव फलतीत्याशयेनाह। क्रियार्था क्रियेति। स्थानिन इत्यस्यैवार्थकथनम् अप्रयुज्यमानस्येति। तुमुन्निति ण्वुलो
प्युपलक्षणं फलेभ्यो यातीत्यस्य फलान्याहारक इति विवरणे बाधकाभावात्। कर्मणीति। तथा च द्वितीयापवादोयमिति भावः।
यत्तु प्रसादकृता व्याख्यातम् अप्रयुज्यमानस्यैव कर्मणि यथा स्यात् प्रयुज्यमानस्य कर्मणि माभूदिति नियमार्थं सूत्रमिति तत्
दसत्। अप्राप्तस्य नियमायोगात्। न चेह तादर्थ्य इति प्राप्तिः शंक्या यानक्रियायाः फलार्थत्वाभावात्। आहरणं हि यानक्रि- पो ४
या आहरणं तु फलकर्मकमित्यन्यदेतत्। क्रियार्थोपपदस्य किं प्रविश पिंडीं गृहं प्रवेशनं यद्यपि भक्षणार्थं तथापि भक्षिं प्रति
कृत्रिमोपपदत्वेनास्ति न च तुमुनः कर्मणि तुक्तत्वात् भक्षिकर्मणि चतुर्थ्याः प्रसक्तिरेव नास्तीति प्रत्युदाहरणमिदं न संगच्छ-
त इति वाच्यम्। सति तु क्रियार्थोपपदस्येति पदे तुमुन्ण्वुलौ क्रियायामित्येतद्विषयकमेवेदं सूत्रमिति तुमुन इति लभ्यते ना-
न्यथेति प्रत्युदाहरणस्यासंगतत्वाभावात्। तुमर्थात् अव्ययकृतो भावे इति तुमुनो भाव एव विधानात्। तदर्थस्य भाव-
वचनत्वेपि हि पुनर्भाववचनग्रहणं सूत्रे विशेषपरिग्रहार्थमित्याह। भाववचनाश्चेतीति। न च तादर्थ्य इत्येव गतार्थता शंक्या क्रियार्थो- ग
पपदके न भाववचनाश्चेति ब्रह्मा तुमुनेव तादर्थ्यस्य द्योतितत्वात् प्राप्तिवद्धि कार्यमात्रे प्रयमाप्राप्तावेव सूत्रारंभात्। यत्तु प्रसादकृ-
ता ... कं भाववचनादेव यथा स्यात् पाचको व्रजतीति ण्वुलन्तान्माभूदिति नियमार्थमिदं सूत्रमिति तन्न ण्वुलः कर्तृवाचकतया
तुमर्थकत्वाभावेन नियमार्थत्वायोगात् ण्वुलं कर्तुः प्राधान्यात् कर्तारं प्रति च तादर्थ्याभावात् गुणीभूतपाकं प्रति तादर्थ्यसंभवे-
पि पाकवाचकधातोस्तु तादर्थ्ययोगात् ब्रह्म तुमर्थात् किं पचनं वर्तते भाववचनात् किं पाकः त्यागः सूत्रवदिति। क्रियार्थोपपदस्येत्यनु-
वर्तते पंचम्या विपरिणम्य व्याख्याने बाधकाभावात्। भाववचनादिति त्यक्तुं शक्यं न चैवं तुमर्थादित्येव त्यक्तव्यमिति वाच्यं। वर्तिस्त्वाद्येव
संभवे गौरवाश्रयणायोगादिति। बलीयसीति। हरये नम इत्यत्र तदुद्देशनक्रियाद्वारा हरिनमस्कारयोः संबंधः हर्युद्देशको नमस्का-
र इति एवं चोद्देशनक्रियावगतौ विलंब इति कारकविभक्तेर्बलीयस्त्वमित्येके। अन्ये तु उपपदविभक्त्या संबंधसामान्यमेवावगम्यते न विशे-
षावगमस्तु पर्यवसानकरणादिपर्यालोचनाधीनः कारकविभक्त्या तु ... कर्मत्वादिसंबंधविशेषो झटित्येवावगम्यते इति तस्या बलीयस्त्वमि-

त्याहुः। अप्राणिष्विति। ननु श्वभ्यादियोगे षष्ठ्येवास्तु अलं शब्दस्तु पर्याप्तीतरार्थक एव गृह्यतामित्याशंक्याह तस्मै प्रभवतीति न त्वां तृणमि
त्यादि। ननु तृणादिवद्बुसशब्दादपि पक्षे चतुर्थी भाव्यमेव मन्नादर इत्यस्य कर्मविशेषणत्वेन अनादरद्योतकं यत्कर्म तत्र चतु
र्थीति व्याख्यानात् तृणं ह्यत्रानादरद्योतकं न तु युष्मदर्थः स्यादेतत् त्वां तृणं मन्ये तृणाय वेत्युदाहृतौ यत्तो किमनेन नञः प्रयो
गेण अत्राहुः। कुत्सितग्रहणं कर्त्तव्यमिति वार्त्तिकमस्ति तेन यद्यपि न अनुक्तौ विधीयते ततो निकृष्टत्वेन यदि कु
त्सा प्रतिपाद्यते तदा चतुर्थी भवति न तु साम्यविवक्षायां तादृशी च कुत्सा प्राप्तीति नञः प्रयोग इत्येवं भवतीति न त्वामित्युक्तमिति
श्यना निर्देशादिति न च मन्यत इति यका निर्देशः किं न स्यादिति वाच्यं अनभिहित इत्यधिकारात् न हि यका योगे अनभि
हितं कर्म संभवति श्यन विदैवादिकधातूपलक्षणमात्रे न तु स्वयं विवक्षितः तेन तृणाय मत्वा रघुनंदनो विवालिनरक्षः प्र
धानान्तिशास्यदिति भट्टिप्रयोगः संगच्छते नौकाकान्नेति व्यवस्थितविभाषेति भावः गत्यर्थकर्मणीति गत्यर्थेति किं ओदनं पच
ति कर्मणीति किं अश्वेन व्रजति अनध्वनीत्यत्र अध्वनीति न स्वरूपग्रहणं तथा हि सत्यनध्वन इत्येवावक्ष्यत् किंत्वर्थग्रहणं सप्तमी
निर्देशात्कर्मणीत्यनेन सामानाधिकरण्यात् अर्थस्यैव हि कर्मत्वं संभवति न शब्दस्वरूपस्य तेनाध्ववाचिनां सर्वेषामे वे
व निषेधस्तथा च वार्त्तिकं अध्वन्यर्थग्रहणमिति गंत्राधिष्ठित इति आस्थितप्रतिषेधो वक्तव्य इति वार्त्तिकादिति भावः आ
स्थितः संप्राप्तः पंथानं गच्छतीत्यत्र हि पंथाः आक्रान्त एवेति न पक्षे चतुर्थी यदा त्वप्राप्तत्वेन विवक्षा तदा पक्षे भवत्येव सा इहानध्वनी
त्यध्वनी का संप्राप्त इति दर्शितं तेन स्त्रियं गच्छतीत्यत्र स्त्री प्राप्तैवेति न चतुर्थी अत्र व्याचक्षते अजां नयति ग्राममित्यत्र तु न भवत्येव च १३
तुर्थी अगत्यर्थत्वात् आहेत्यादिना अत्र प्रतीयते गतिर्न त्वसौ नयतेरर्थः प्रापणवाचित्वादिति गत्यर्थकर्मणि चतुर्थी वेति वक्तव्ये द्वितीयाग्रह
णमपवादविषयेपि द्वितीया यथा स्यादित्येतदर्थं तेन ग्रामं गंतेत्यत्र कृद्योगलक्षणा षष्ठी न भवतीति वृत्तिकृतोक्तं। इति चतुर्थी।
ध्रुवमपाये ध्रु गतिस्थैर्ययोः अस्मात्पचाद्यच् कुटादित्वात् ङित्वे उवङ् ध्रुव स्थैर्ये इति केचित्पठंति तत्र गुधेतिकः ध्रुवं स्थिरमपा
यशब्देन विवक्षितमाह विश्लेषेति एवं च प्रकृतधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयो ध्रुवमिति फलितं तद्यथा धावदवधिरेवे
त्याह। अवधिभूतमिति। धावत इति। इह धावनक्रियाविशिष्टस्याश्वस्य प्रकृतधातूपात्तक्रियाश्रयत्वमवधित्वेन विरुध्यते

परस्परस्मान्मेषावपसरतइत्यनुसृधातुनागतिद्वयस्याप्युपादानादेकनिष्ठांगतिंप्रतीतरस्यापादानत्वंनविरुध्यते उभेचसरि
णा। अपायेयदुदासीनंचलंवायदिवाचलं ध्रुवमेवातदावेशात्तदपादानमुच्यते १ पततोध्रुवएवाश्वोयस्मादश्वात्
तत्यसौ तस्याप्यश्वस्यपतनेकुड्यादिध्रुवमिष्यते २ मेषांतरक्रियापेक्षमवधित्वंपृथक्पृथक् मेषयोःस्वक्रियापेक्षंकर्तृत्वंच पृ
थक्पृथगिति पर्वतात्पततोऽश्वात्पततीत्यत्रतुपर्वतावधिकपतनाश्रयोऽश्वस्तदवधिकदेवदत्तादिनिष्ठपतनमपि पंचम्यर्थ
रवधौ अभेदेनसंसर्गेणान्वयइत्यर्थः पर्वतादिविशेषणं वृत्यर्थस्तत्पतनक्रियायाः सचावधिरूपोधर्मोनतुधर्ममात्रमुक्तौ
दनात्स्थालीत्यत्रओदनकर्मकोद्धरणावधिभूतास्थालीतिसमानाधिकरणपदर्शनादेतद्व्यमनोरमायांस्थितंनविहध्रुव
ग्रहणंकिमर्थंनचग्रामादागच्छतिशकटेनेत्यत्रशकटेऽतिव्याप्तिवारणायतदितिवाच्यं परत्वात्तत्रकरणसंज्ञाप्रवृत्तेः नच
संज्ञिनिर्देशार्थंध्रुवग्रहणंकारकाधिकारात् कारकमितिलभ्यतइतिध्रुवग्रहणंचिंत्यप्रयोजनमितिचेत् अत्रवदंतिका
रकत्वरूपव्यापकधर्ममात्रविवक्षायांसाधकतमत्वेनविवक्षाभावदशायांकरणसंज्ञाप्रसंगेनशकटस्यापादानत्वंस्यात्
गु तन्माभूदित्येतदर्थंध्रुवग्रहणं। जुगुप्सेति। जुगुप्सानिंदा विरामोविरतिः प्रमादोनवधानता १ तदर्थकानांधातूनांकारके
अपादानसंज्ञास्यादित्यर्थः संयोगपूर्वकोविश्लेषोविभागः सचेहनास्तिबुद्धिकृतस्तुगौणत्वान्नगृह्यतइतिसूत्रेणाप्राप्तौ
वार्त्तिकारंभः भाष्यकारस्तु कारकप्रकरणेगौणमुख्यन्यायोनाश्रीयतइतितमेवग्रहणेनज्ञापितत्वाज्जुगुप्सादीनांतत्पूर्व
कनिवृत्तिवाचित्वमाश्रित्येदंवार्त्तिकंभीत्रार्थानामित्यादिसूत्राणिचप्रत्याचख्यौ एवंहिबुद्ध्यापायंसंप्राप्यततोदोषदर्शनान्निवर्तंतइत्य
स्त्येवात्रबुद्धिकृतोऽपायः भीत्रा कस्यबिभ्यतिदेवाश्चजातरोषस्यसंयुगे इतिरामयणेतु कस्येत्यस्यसंयुगेनात्वयान्नास्तिभय
हेतुत्वमितिषष्ठीप्रयोगस्संगच्छते एवंचैवंसंयुगस्यापादानात्वापत्तिरितिवाच्यं परत्वादधिकरणसंज्ञया अपादानसंज्ञाबाधा
त् अधिकरणत्वाविवक्षायांतुइष्टापत्तेः भीत्रार्थेति किंव्याघ्रंपश्यति नचकर्मत्वेनबाधःशंक्यः कर्मत्वाविवक्षायांशेषषष्ठींबाधित्वा
पंचमीप्रसंगादित्याहुः भयहेतोर्ग्रहणंकिंत्यप्रयोजनमरण्येबिभीत्यत्रपरत्वादधिकरणसंज्ञाप्रवृत्तेरितिचेत् अत्रैवंवदंति भ
यहेतुग्रहणाभावेकारकशेषत्वविवक्षायामतिप्रसंगः स्यात्तत्पाचारणेस्यचौराद्बिभेतीतिप्रयोगोनस्यादिति पराजेः अध्यप

नादित्तीत्यत्र अध्ययनसंबंधिनी ग्लानिरित्यर्थः। कारकशेषत्वेन षष्ठ्यां प्राप्तायामिदं पराजयतेरिति विपरिभ्यां जेरिति तङ्। असोढ
इति। क्तापेक्षाभूतकालेन विवक्षितत्वेनाध्ययनात् पराजिग्यत इत्यादि सिद्धं नन्वसोढग्रहणं व्यर्थं शत्रून् पराजयत इत्यत्र परत्वा
त्कर्मसंज्ञासिद्धेः अत्र वदंति कर्मत्वाविवक्षायां शेषषष्ठी वा चित्वा पंचमी स्यात् समासे मा भूदिति कर्तव्यमेवासोढग्रहणमिति
वारणार्थानामीप्सितः यवेभ्य इति यवसंबंधिगोगत्यैव गां निवारयतीति ध्रुवमपाय इत्यनेनासिद्धेरयमारंभः बुद्धिपरिकल्पिता
पायमसंगीकुर्वतोऽप्याकारस्य मते तु वैयर्थ्यमेतस्य स्फुटमेव गां वारयतीति वृञ् वरणे चुरादिः गामित्यत्र ईप्सितत्व
प्रयुक्तापादानसंज्ञा न भवति ईप्सिततमत्वविवक्षायां परत्वात्कर्मसंज्ञाप्रवृत्तेः नन्वेवमीप्सितग्रहणमेव व्यर्थं कूपे वा
वारयतीत्यत्र परत्वादधिकरणसंज्ञाप्रवृत्तेः सत्यं अधिकरणस्य शेषत्वविवक्षायामिदं प्रत्युदाहरणमिति पूर्वोक्तरी
त्या पदद्वयोजनस्यापि कल्पयितुं शक्यत्वात्। अंतर्द्धौ। येनेति कर्तरि तृतीया न चक्षुषो शेषषष्ठी प्रसंगः उभयप्राप्तौ क
र्मण्येवेति नियमात् अत्रात्मन इति गम्यमानत्वात् संबंधस्तूभयोः प्राप्तिः निलीयत इति लीङ् श्लेषणे दैवादिकः
नन्वंतर्द्धाविति व्यर्थं नदिदृक्षते चौरानित्यत्र परत्वात्कर्मसंज्ञासिद्धेः अत्राहुः चौरा आत्मानं माद्राक्षुरिति बुद्ध्या चौरा
न्नदिदृक्षत इत्ययमर्थोऽत्र विवक्षितस्तत्र कर्मणः शेषत्वविवक्षायामिदं पूर्ववत् प्रत्युदाहरणमिति सावकाशकर्मत्वात्
द्वित्वेनैतज्जनितद्वित्वप्रयोजनमिति निश्चितं आख्यातोपयोगे नियमपूर्वकेति तत्रैवोपयोगशब्दो रूढ इति भावः आख्यातेत्येतत्तज्जन १८
मित्याह वक्तेति। उपाध्यायादिति उपेत्यास्मादधीयत इति उपाध्यायः इङ् अध्ययने इति घञ् अध्ययनं तु गुरूच्चारणानूच्चारणं नियमपू
र्वकं नटस्येति गाथाकर्मकं नटसंबंधि श्रवणमित्यर्थः नटस्य गाथान्वये तु कारकत्वाभावाद् बाधानेऽय योगग्रहणमसा
मर्थितं स्यात्। जनिकर्तुः जननं जनिरुत्पत्तिः इञ् जनादिभ्य इति जने भावे इञ् जनिवध्योश्चेति वृद्धिप्रतिषेधः तस्याः कर्तेति शे
षषष्ठ्या समासो न तु कारकषष्ठ्या तज्जकाभ्यामिति निषेधात् एवं चोत्पत्त्याश्रयस्य यो हेतुस्तदपादानमित्यर्थो लब्धवेत्
स्योगेऽप्यपादानत्वं भवत्येव अंगादंगात्संभवसीति यथा तदेतदाह जायमानस्येति। एतेन क्तिपो धातुनिर्देश इति इकाश्तिपौ
जेनिरित्यात्प्रिययगमनेतुपधालोपमप्रसंगतिं समासान्तु पत्तिं चोद्यं ब्राह्मव्याकरणाधिकरणे गजेतोमीमांसकाः समा

ह

हितार्द्ध इति भावः इह प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मतं पुत्रात्प्रमोदो जायत इत्युदाहरणात् उपादानमात्रमिति तु भा ८४
ष्यकैयटमतं तदुभयसाधारणमुदाहरणमाह ब्रह्मण इति ब्रह्मा हिरण्यगर्भः स च हेतुरेव न तु उपादानं किं च मायोप
हितं चैतन्यं ब्रह्म तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः भुवः भवनं भूः रिति संपदादित्वात् क्विप् पूर्वसूत्रस
मासनिर्दिष्टमपि कर्तृग्रहणमनुवर्तते स्वरितत्वादित्याह भूकर्तुरिति प्रभवत्यस्मात् इति प्रभवः अकर्तरि च का
रके इत्यधि[illegible]कारादपादानेऽर्थे ऋदोरप् जनिकर्तुरित्येव सिद्धे र नर्थकमिदमित्याशङ्कां परिहरन्नाह तत्प्र
काशत इति प्रपमं दृश्यत इत्यर्थः पृथक् चार्थो धातूनामनेकार्थत्वाल्लभ्यते तथा चाभूतप्रादुर्भावो जनिः अन्यतः सिद्धस्य प्र
थममुपलम्भः प्रभव इत्यर्थभेदोऽस्तीति भावः भीत्रार्थानामित्यत्र भयहेतुः चौर इति भाष्ये प्रत्याख्यातात्तत्रेत्थमुपपत्तिः
भवः चौरेभ्यो बिभेति भयान्निवर्तत इत्यर्थः त्रायते रक्षणेन चौरेभ्यो निवर्तयतीत्यर्थः पराजयते ग्लान्याति वर्तत इत्य
र्थः वारयति प्रवृत्तिप्रतिबन्धेन निवर्तयतीत्यर्थः निलीयते निलीयतेन निवर्तत इत्यर्थः अधीते उपाध्यायान्निःसर
त शब्दं गृह्णातीत्यर्थः ब्रह्मणः प्रपञ्चो जायत इत्यत्रापि ततोऽपक्रामति निर्गच्छतीत्यर्थः प्रभवतीत्यत्रापि भवनपूर्वकं
निःसरणमर्थस्तथा च ध्रुवमपाय इत्यनेनैवेष्टरूपसिद्धिरिति वस्तुतस्तु निवृत्तिनिःसरणादि धात्वर्थान्तरार्थ विशिष्टे
स्वार्थे वृत्तिमाश्रित्य यथा कथंचिदुक्तप्रयोगाणां समर्थनेऽपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः न टस्य स्मरणीति
तिवत् नह्युपाध्यायन टयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः अनभिधानं वहुलं सूत्रमाश्रित्य प्रत्याख्यानं
तु नातीव मनोरममेवं ॥ जुगुप्साविरामेत्यादि वार्तिकमप्यावश्यकं रमणीयं तथा सूत्रवार्तिकमतमेवेह प्रवलं तथा
ध्रुवं भयहेतुरसोढ इत्यादि संज्ञिनिर्देशो विस्तार्थकः परत्वात्तत्संज्ञा प्राप्ता वा विशेषत्वविवक्षायां न मायाणां मर्म्मी
यादित्वादविवक्षाया इष्टत्वात् तत्रापादानसंज्ञाया वारणीयत्वात् एतच्च शब्दकौस्तुभे स्थितं ल्यब्लोप इति ल्यपं

तस्यागम्यमानार्थत्वादप्रयो[illegible] गइत्यर्थः ल्यबग्रहणमिह ल्यबर्थपरं तेन क्तो पि ल्लोपे सिध्यति आसने स्थित्वा प्रेक्षते
आसनात्प्रेक्षत इति यतश्चेति पदवधित्वेनाश्रित्याध्वनः कालस्य वा निर्माणं परिच्छेदः प्रतिपाद्यते तत इत्यर्थः तेन पंच
ता मथुर्या नार्थं दूरा युक्ता त्रिभिर्मासैः माध्ववाचिनः प्रथमासप्तम्यौ स्तः कालादिति इहापि तद्युक्तादित्यपेक्षते आग्रहायण्या
ति अश्वगे हायनमस्याः साप्रत्यादेराकृतिगणत्वात्स्वार्थिकोण पूर्वपदात्संज्ञायामिति णत्वं अन्यारात्प्रभृत्यग्रहणमिति व्याख्या
नादिति भावः प्रपंचार्थमिति नच इतरस्त्वन्यनीचयोरित्यमरोक्तेनीचार्थस्येदं ग्रहणमस्त्विति वाच्यं अस्मात्तारो मंदो
वेति वत्यं चमी विभक्त इत्यनेनैव सिद्धत्वात् अन्यो भिन्न इतरो वेति नचैवं घटः पटो नेत्यत्रापि प्रसंगः नञो पि भेदे शक्त
त्वादिति वाच्यं निपातानां द्योतकत्वमेव न तु वाचकत्वमित्यभ्युपगमात् आराद्वनादिति इह दूरार्थे [illegible] अन्यतर
स्यामिति प्राप्ते ऋते कृष्णादिति कथं तर्हि फलति पुरुषाराधनमृते इति प्रयोग इति चेत् प्रमाद एवेति हरदत्तः अन्ये तु
ततोऽन्यत्रापि दृश्यत इति दृशिग्रहणाद्वैश्रयावधीतमित्यादाविवात्र ऋतेयोगे द्वितीयापि साधुरित्याहुः अस्मिन् व्याख्याने
अ० ऋते द्वितीया चेति चान्द्रसूत्रमनुकूलं दिशि दृष्ट इति रूढेति शेषः तेनैन्द्र्यो दिशो नात्र गृह्यते नन्वेवं ककुभादिग्रहणं प्रस
ग इति चेत् अत्राहुः अन्यतरसाहचर्याद्व्याख्यानाद्वा दिग्भिन्नेऽर्थे यो दृष्टः सोत्र न गृह्यत इति दिक् शब्दत्वेपीति यद्यप्य
दिक् शब्दोप्युत्तरपदमस्ति सद्भाव इत्यादिस्तथापि दिक्शब्दसाहचर्यादुत्तरपदेन प्रागित्यादि दिक्शब्द एव गृह्य
ते तेन सद्भावादेव पदे नेत्यत्र नातिप्रसंग इति भावः दक्षिणाग्रामादिति दिक्शब्दत्वेनैव सिद्धे आजादिग्रहणं चिंत्यप्रयोजन
मित्याहुः प्रभृतिप्रयोग इति प्रभृत्यर्थे योग इत्यर्थः तथा च कार्त्तिकाः प्रभृतीति भाष्ये विवृत एव ता[illegible] कैयटेन तत आरभ्ये १५
त्यर्थ इति प्रयुक्तं ग्रामाद्बहिरिति ज्ञापकसिद्धं न सर्वत्रेति करस्य करभो बहिरिति सिद्धं अपपरिवर्जने किं परिषिंच
ति सर्वतः इत्यर्थः अत्रोपसर्गत्वास्पत्व वचनग्रहणादिति विनाते नेति मर्यादा स्तते नेत्यभिव्याप्ति विधिरित्यत्र पञ्च पातो विशेषो
विशेषणं शरूपः सोत्र न गृह्यते वचनग्रहणसामर्थ्यात् किंतु अवधितामात्रे विवक्ष्यत इत्यर्थः प्रसंगतः यद्वा मर्यादाशब्दो